# MASTERS OF ARTS
# IN
# SANSKRIT

## POETICS AND DRAMATURGY-II

**Paper-10**

NAAC ACCREDITED A+


## UTKAL UNIVERSITY

**VANI VIHAR, BHUBANESWAR, ODISHA-751004**

**DIRECTORATE OF DISTANCE & CONTINUING EDUCATION**
**UTKAL UNIVERSITY : VANI VIHAR**
**BHUBANESWAR-751007**

**From the Director's Desk**

The Directorate of Distance & Continuing Education, originally established as the University Evening College way back in 1962 has travelled a long way in the last 52 years. 'EDUCATION FOR ALL' is our motto. Increasingly the Open and Distance Learning institutions are aspiring to provide education for anyone, anytime and anywhere. DDCE, Utkal University has been constantly striving to rise up to the challenges of Open Distance Learning system. Nearly one lakh students have passed through the portals of this great temple of learning. We may not have numerous great tales of outstanding academic achievements but we have great tales of success in life, of recovering lost opportunities, tremendous satisfaction in life, turning points in career and those who feel that without us they would not be where they are today. There are also flashes when our students figure in best ten in their honours subjects. Our students must be free from despair and negative attitude. They must be enthusiastic, full of energy and confident of their future. To meet the needs of quality enhancement and to address the quality concerns of our stake holders over the years, we are switching over to self instructional material printed courseware. We are sure that students would go beyond the course ware provided by us. We are aware that most of you are working and have also family responsibility. Please remember that only a busy person has time for everything and a lazy person has none. We are sure, that you will be able to chalk out a well planned programme to study the courseware. By choosing to pursue a course in distance mode, you have made a commitment for self improvement and acquiring higher educational qualification. You should rise up to your commitment. Every student must go beyond the standard books and self instructional course material. You should read number of books and use ICT learning resources like the internet, television and radio programmes etc. As only limited number of classes will be held, a student should come to the personal contact programme well prepared. The PCP should be used for clarification of doubt and counselling. This can only happen if you read the course material before PCP. You can always mail your feedback on the course ware to us. It is very important that one should discuss the contents of the course materials with other fellow learners.

We wish you happy reading.

**DIRECTOR**

## Paper-10. Poetics and Dramaturgy-II

Unit-I. Kavyaprakasha Chapter-I (Kavyalaksana, Kavyaprayojana, Kavyahetu and avyabheda)

Unit-II. Kavyaprakasha Chap-II Sabdashakti, - Abhidha, Laksana, Vyanjana, Abhihitanvayavada, Anvitabhidanavada

Unit-III. Sahitya-darpana, Ch-III

Unit-IV. Dhvanyaloka Uddyota-1, Karikas 9-19

Unit-V. A Term paper on Grammar of 30 typed pages. (Paper presentation-15 Viva-voce- 05)

**Books Recommended:**

1. Kavyaprakasha with Sanskrit Commentary, Ed. V. Jhalkikar, BORI, Pune, 1965.
2. Kavyaprakasha, Chaukhamba Prakashan, Varanasi
3. Indian Literary Theories, by K. Krishnamurthy, Delhi, 1985
4. Bharatiya Kavyasashtra ki Bhumika (in Hindi), Nagendra, Delhi, 1963
5. Dhvanyaloka of Anandavardhana, K. Krishnamurthy, Motilal Banarsi Dass, Delhi, 1982.
6. Sahitya-darpana (Ed.) P.V. Kane
7. Sahitya-darpana with the comm.. Laksmi

# UNIT–I

# इकाई–प्रथम

# काव्य प्रकाश

**२. इहाभिधेयं सप्रयोजनमित्याह–**

**काव्यंयशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**
**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥ २॥**

कालिदासादीनामिव यशः श्री हर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजनमौलिभेतं समनन्तरमेव रसास्वादनासमुद्भूतं विगलितवेद्यान्तरमानन्दं, प्रभुसम्मितशब्दप्रधान-वेदादिशास्त्रेभ्यः सुहृत्सम्मितार्थतात्पर्यवत्पुराणादीतिहासेभ्यश्च शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यं लोकोत्तरवर्णना निपुण कविकर्म तत् कान्तेव सरसतापादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च करोतीति सर्वथा तत्र यतनीयम्।

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः।**
**अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः॥ १२॥**
**–सांख्यकारिका**

'यस्य कार्यात् पूर्वभावो नियतोऽनन्यथासिद्धश्च तत् कारणम्। यथा तन्तुवेमादिकं पटस्य कारणम्।'

**आनन्द टीका**–काव्यं नाम जगति कालीदासादीनामिव यशः प्राप्त्यै, लोकाद्धनार्जनाय, लोकव्यवहारपरिज्ञानाय, अमङ्गलविनाशाय, त्वरितमेव काव्यरसास्वादनरूपपरमानन्दाधिगमाय, प्रियतमातुल्यसरसोपदेशप्रदानाय, भवतीति सर्वथा तत्र यतनीयम्।

NOTES

**वेदनिद्येतिहासानामाख्यानपरिकल्पनम्।**
**विनोदजननं लोके नाट्यमेतद् भविष्यति॥**

**दु:खार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम्।**
**विश्रामजननं लोके नाट्यमेतद्भविष्यति॥** *–नाट्यशास्त्र*

**एवमस्य प्रयोजनमुक्त्वा कारणमाह–**

**शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्।**
**काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥ ३॥**

**धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।**
**करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम्॥**

**धर्मादिसाधनोपाय: सुकुमारक्रमोदित:।**
**काव्यबन्धोऽभिजातानां हृदयाह्लादकारक:॥**

**चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।**
**काव्यामृतरसेनान्तश्चमत्कारो वितन्यते॥**

*–वक्रोक्तिजीवित १.४–५*

शक्ति: कवित्वबीजरूप: संस्कारविशेष:। यां विना काव्यं न प्रसरेत् प्रसृतं वा उपहसनीयं स्यात्। लोकस्य स्थावरजङ्गमात्मकलोकवृत्तस्य शास्त्राणां छन्दोव्याकरणाभिधानकोशकलाचतुर्वर्गगजतुरगखड्गादिलक्षणग्रन्थानां काव्यानां च महाकविसम्बन्धिनाम्, आदिग्रहणादितिहासादीनां च विमर्शनाद् व्युत्पत्ति:। काव्यं कर्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौन: पुन्येन प्रवृत्तिरिति त्रय: समुदिता न तु व्यस्तास्तस्य काव्यस्योद्भवे निर्माणे समुल्लासे च हेतुर्न्न तु हेतव:।

**आनन्द टीका**–'कवित्वस्य मूलकारणभूता जन्मजन्मान्तरसञ्चितसंस्कार-विशिष्टा काचिद् दैवी कृपेति नामधेया कविहृदयनवनवार्थप्रकाशिका प्रज्ञेति प्रतिभैव शक्ति:, चराचरलोकव्यवहाराणां सकलशास्त्रप्रतिपादकग्रन्थानां महाकविरचितकाव्यानां महाभारतादीतिहासादीनां च पर्यालोचनादधिगता निपुणता, काव्यज्ञै: समीक्षकैश्च लब्धशिक्षयाविरतात्मप्रवृत्तिरेवाभ्यास:। दण्डचक्रादिन्यायेन शक्तिनिपुणताभ्यासास्त्रस्य: सम्मिल्य न तु पृथग्भूता: क्रमश: काव्यस्योत्पत्तौ निर्माणे प्रकाशे च कारणमिति।'

'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता'
'प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा।'

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।
यस्त्वशक्तिकृतस्य स झटित्यवभासते॥

*—ध्वन्यालोक ३-६ वृत्तिभाग*

**एवमस्य कारणमुक्त्वा स्वरूपमाह—**

**४: ( सू.१ ) तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि।**

दोषगुणालङ्काराः वक्ष्यन्ते। क्वापीत्यनेनैतदाह यत्सर्वत्र सालङ्कारौ, क्वचित्तु स्फुटालङ्कारविरहेऽपि न काव्यत्वहानिः।

नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।
कवित्वं दुर्लभं तत्र शक्तिस्तत्र च दुर्लभा॥

व्युत्पत्तिर्दुर्लभा तत्र विवेकस्तत्र दुर्लभः।
सर्वं शास्त्रमविद्वद्भिर्मृग्यमाणं न दुष्यति॥

काव्यं तु जायते जातु कस्यचिद् प्रतिभावतः।
शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनम्।
विलोक्यान्यनिबन्धाँश्च कार्यः काव्यक्रियादरः॥

नैसर्गिकी च प्रतिभा श्रुतं च बहु निर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥

'लोको विद्या प्रकीर्णञ्च काव्याङ्गानि'

*—काव्यालङ्कारसूत्रवृत्ति १.३.१*

'अनेनानन्त्यमायाति कवीनां प्रतिभागुणः'

*—ध्वन्यालोक ४.१*

**यथा—**

यः कौमारहरः स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलितमालतीसुरभयः प्रौढाः कदम्बानिलाः।

सा चैवास्मि तथापि तत्र सुरतव्यापारलीलाविधौ रेवारोधसि वेतसीतरुतले चेतः समुत्कण्ठते॥ १॥

अत्र स्फुटो न कश्चिदलङ्कारः। रसस्य च प्राधान्यान्नालङ्कारता।

NOTES

NOTES

**सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभा विशेषम्।।**

*–ध्वन्यालोक–* १.६

**'त्रितयमिदं व्याप्रियते शक्तिर्व्युत्पत्तिरभ्यासः।'**

**आनन्द टीका–**श्रुतिकट्वादिकाव्यरसापघातकदोषमुक्तौ माधुर्यौजः-प्रसादाख्यगुणसहितौ सर्वत्र सालङ्कारौ किञ्च कुत्रचित्तूपमारूपकादिव्यक्ता-लङ्कारहीनावपि सरसौ शब्दार्थौ तत् काव्यमिति। लक्षणेऽस्मिन् विश्वनाथेन 'अदोषौ', 'सगुणौ', 'अनलङ्कृती' पदानि जयदेवेन 'अनलङ्कृती' पदं पण्डितराजजगन्नाथेन 'शब्दार्थौ' पदं समालोचितानि।

विश्वनाथस्य 'अदोषौ' पदस्याक्षेपः केवलं पाण्डित्यप्रदर्शनार्थमेव। यतो हि मम्मटेन–'मुख्यार्थ हतिर्दोषो रसश्च मुख्यस्तदाश्रयाद्वाच्यः' स्वयमेव प्रतिपादितम्। अर्थात् काव्ये मुख्यतत्त्वस्य रसस्यापघातको हि दोषः। तस्माद्रसानुभूतौ काव्यचमत्कारे वा कापि बाधा न स्यात्तर्हि न्यूनदोषदूषितत्वादपि न काव्यत्वहानिः। शब्दार्थयोः सगुणपदस्याक्षेपोऽप्यनुपपन्नः 'ये रसस्याङ्गिनो धर्माः ....' इत्यादिना गुणानां नित्यरसधर्मत्वमङ्गीकारात्। शब्दार्थयोः रसव्यञ्जकत्वेऽपि गौणरूपेण परम्परया वा शब्दार्थयुगलस्यापि धर्मत्वात्तथा सगुणपदेनैवोत्तममध्यमाधमका-व्यानामपि समायोजनात् मम्मटसुविचारितं सगुणं समुचितमेव विद्यते।

विश्वनाथजयदेवयोः 'अनलङ्कृती' पदस्याक्षेपोऽपि साहित्यदर्पणकाव्य-प्रकाशादीनां टीकाकारैः सम्यग् निराकृतः। 'अनलङ्कृती' त्यत्र -'नञ्' ईषदर्थकः। अतः काव्ये शब्दार्थौ प्रायः सालङ्कारौ, तथापि काव्यत्वसिद्धये सरसत्वात् स्फुटता नानिवार्या। अपितु पदेनानेन काव्येऽलङ्कराणां गौणता रसस्य मुख्यता चापि काव्यलक्षणे हि मम्मटेन संसूचिता। तथापि – 'मा निषाद प्रतिष्ठामि' त्यत्र न कोऽपि स्फुटालङ्कारः परञ्चात्र दुष्टकाव्यत्वसिद्धये विश्वनाथजयदेवादयोऽप्यक्षमाः।

शब्दनिष्ठानां पण्डितराजजगन्नाथजयदेवादीनामाचार्याणां 'शब्दार्थौ' पदाक्षेपनिराकरणं रसगंगाधरस्य टिप्पणीकारेण नागेशभट्टेन स्वयमेव कृतम्। तद्यथा–मम्मटेन व्यासज्यवृत्या (शब्दे अर्थे च व्याप्तिः) शब्दार्थयुगलं काव्यमुररीकृतम्। काव्यं नाम शब्दार्थयोः सहभावे हि विद्यते। लोके 'काव्यमुच्चै पठ्यते', 'काव्यं श्रुतम्', 'काव्यं ज्ञातम्' इत्यादि व्यवहारे ज्ञातता किं वा बोधनक्षमता अर्थस्यैव विद्यते न तु शब्दस्य। पतञ्जलिनाऽपि 'तदधीते

तद्वेद' इति पाणिनीयसूत्रे शब्दार्थयुगले हि वेदादिस्वरूपं परिगणितम्। अतः सर्वाक्षेपनिरसनाद् मम्मटकाव्यलक्षणं संसिद्धमिति।

NOTES

**'सकलालङ्कारयुक्तमपि काव्यमेकेनापि दोषेण दुष्येत्।'**

**कीटानुविद्धरत्नादि साधारण्येन काव्यता।**
**दुष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः॥**

**ये रसस्याङ्गिनोधर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणाः॥** *का.प्र. ८-८७॥*

**तत्सादृश्यं तदन्यत्वं तदल्पत्वं विरोधिता।**
**अप्राशस्त्यमभावश्च नञर्थाः षट् प्रकीर्तिताः॥**

**(अ) अदोषौः–**'यदि दोषरहितस्यैव काव्यत्वाङ्गीकारस्तदान्यक्कारो ह्ययमेव...' अस्य श्लोकस्य विधेयाविमर्शदोषदुष्टतया काव्यत्वं न स्यात्। प्रत्युत ध्वनित्वेनोत्तमकाव्यताऽस्याङ्गीकृता, तस्मादव्याप्तिर्लक्षणदोषः। यथा–

**न्यक्कारो ह्ययमेव मे यदरयस्तत्राऽप्यसौ तापसः**
**सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।**
**धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**
**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥**

*–साहित्यदर्पण-प्रथम परिच्छेद*

**(ब) सगुणौ–**'शब्दार्थयोः सगुणत्वविशेषणमनुपपन्नम्। गुणानां रसैकधर्मत्वस्य–ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः इत्यादिना तेनैव प्रतिपादकत्वात्।'

**(स) अनलङ्कृती पुनः क्वापि–**'अनलङ्कृती पुनः क्वापि' इति यदुक्तम्, तदपि परास्तम्। अस्यार्थः - सर्वत्र सालङ्कारौ क्वचित्त्वस्फुटालङ्कारावपि शब्दार्थौ काव्यमिति। तत्र सालङ्कारशब्दार्थयोरपि काव्ये उत्कर्षाधायकत्वात्।'

**२. चन्द्रालोककार 'पीयूषवर्ष' जयदेव का आक्षेप**

**अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती।**
**असौ न मन्यते कस्मादनुष्णमनलं कृती॥ १-८॥**

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥**

NOTES

**श्रीमद्भगवद्गीता–**

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।।

**भरतमुनि–**

मृदुललितपदाढ्यं गूढशब्दार्थहीनं
जनपदसुखबोध्यं युक्तिमन्नृत्ययोज्यम्।

बहुकृतरसमार्गं सन्धिसन्धानयुक्तं,
स भवति शुभकाव्यं नाटकप्रेक्षकाणाम्।।

*–नाट्यशास्त्र १६-११८*

**अग्निपुराण–**

संक्षेपाद्वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।
काव्यं स्फुरदलङ्कारंगुणवद्दोषवर्जितम्।।

*–अग्नि पुराण ३३७-६-७*

**भामह–**

'शब्दार्थौ सहितौ काव्यम्'। *–काव्यालङ्कार १-१६*

**दण्डी–**

'शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली'।

*–काव्यादर्श १-१०*

तदल्पमपि नोपेक्ष्यं काव्ये दुष्टं कथञ्चन।
स्याद्वपुः सुन्दरमपि चित्रेणैकेन दुर्भगम्।। *–काव्यादर्श १-७*

'तैः शरीरं च काव्यानामलङ्काराश्च दर्शिताः।'

*–काव्यादर्श १-१०*

**वामन–**

'काव्यं ग्राह्यमलङ्कारात्। सौन्दर्यमलङ्कारहानादानाभ्याम्।।'

*–काव्यालङ्कार सूत्र १/१/१-२-३*

**रुद्रट–**

**'शब्दार्थौ काव्यम्।' तस्मात्तत्कर्त्तव्यं यत्येन महीयसा रसैर्युक्तम्।**

*–काव्यालङ्कार १२-२*

**आनंदवर्धन–**

**'काव्यास्यात्मा ध्वनिः। शब्दार्थशरीरन्तावत् काव्यम्।'**

*–ध्वन्यालोक-१*

**कुन्तक–**

**शब्दार्थौ सहितौ वक्र कविव्यापारशालिनि।**
**बन्धे व्यवस्थितौ काव्यं तद्विदाल्हाद कारिणि॥**

*–वक्रोक्ति जीवित १-७*

**महिमाभट्ट–**

'विभावादि संयोजनात्मा रसाभिव्यक्त्यव्यभिचारी कविव्यापारः काव्यम्।' यत्र वाच्य प्रतीयमानयोर्गम्यगमकभावसंस्पर्शस्तत् काव्यम्।' 'गुणालङ्कारसंस्कृत-शब्दार्थमात्रशरीरं तावत् काव्यम्।' *–व्यक्ति विवेक पृ. ९५, १३६*

**भोजदेव–**

**निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।**
**रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति॥**

*–सरस्वती कण्ठाभरण १-२*

**क्षेमेन्द्र–**

'औचित्यं काव्यजीवितम्'। काव्यं विशिष्टशब्दार्थ साहित्यसदलङ्कृतिः। औचित्यं रससिद्धस्य स्थिरं काव्यस्य जीवितम्।

*–औचित्य विचार चर्चा-कारिका ५*

**विद्यानाथ–**

**गुणालङ्कारसहितौ शब्दार्थौ दोषवर्जितौ।**
**गद्यपद्योभयमयं काव्यं काव्यविदो विदुः॥**

*–प्रतापरुद्रीय-द्वितीय प्रकरण*

**वाग्भट्ट–**

**'शब्दार्थौ निर्दोषौ सगुणौ प्रायः सालङ्कारौ काव्यम्।'**

*–काव्यानुशासन पृ. १४*

**वाग्भट्टालङ्कारकार वाग्भट्ट–**

**साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम्।**
**स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये।।**

*–वाग्भट्टाङ्कार १/२*

**हेमचद्र–**

**'अदोषो सगुणौ सालङ्कारौ च शब्दार्थौ काव्यम्।'**

*–काव्यानुशासन अ–१/पृ. १६*

**जयदेव–**

**निर्दोषा लक्षणवती सरीतिर्गुणभूषणा।**
**सालङ्काररसानेकवृत्तिर्वाक काव्यनाम भाक्।।**

*–चन्द्रालोक १–७*

**धर्मसूरि–**

**'सगुणालङ्कृती काव्यं पदार्थौ दोषवर्जितौ।'**

**न्यायवागीश–**

**'गुणालङ्कारसंयुक्तौ शब्दार्थौ रसभावगौ।**
**नित्यदोषविनिर्मुक्तौ काव्यमित्यिभिधीयते।।'**

**राजशेखर–**

**'गुणवदलङ्कृतवाक्यमेव काव्यम्।'** *–काव्य मीमांसा*

**अच्युतराय–**

**'तत्र निर्दोषशब्दार्थगुणवत्वे सति स्फुटं,**
**गद्यादिबन्धरूपत्वं काव्यसामान्यलक्षणमिति।'**

**विद्याधर–**

**'शब्दार्थवपुस्तावत् काव्यम्।'**

**शौद्धोदनि–**

**'काव्यं रसादिमद्वाक्यं श्रुतं सुखविशेषकृत्।'**

*–अलङ्कार शेखर १-१*

**विश्वनाथ कविराज–**

**'वाक्यं रसात्मकं काव्यम्।'** *–साहित्यदर्पण-१*

**केशव मिश्र–**

**'रसालङ्कारयुक्तं सुखविशेषसाधनं काव्यम्।'**

*–अलङ्कारशेखर*

**पण्डितराज जगन्नाथ–**

**''रमणीयार्थप्रतिपादकः शब्दः काव्यम्''**–*रस गङ्गाधर–प्रथमानन*

**तद्भेदानाह–**

**४ः (सू.२) इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः॥ ४॥**

इदमिति काव्यम्, बुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जनक्षमस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः, ततस्तन्मतानुसारिभिरन्यैरपि न्यग्भाविताच्य-व्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य।

**आनन्द टीका–**ध्वनिवादिभिर्मुख्यार्थस्योपेक्षया प्रतीयमानार्थस्य प्रकर्षचमत्कारजनकत्वादिदं नव्यमुत्तमं काव्यं किमुत ध्वनिकाव्यमङ्गीकृतम्। काव्ये नूतनस्य ध्वनिशब्दस्य व्यवहारो वैयाकरणानामनुसरणेन विहितः। घटेत्यादिवर्णानां मुखोच्चारणाद् श्रोत्रश्रवणाच्चैते वर्णा ''नादो ध्वनिर्वेति'' कथ्यन्ते। ध्वनीनामाशुतरविनाशाच्छब्दार्थबोधनेऽप्यक्षमत्वाच्च वैयाकरणैः प्रज्ञायां नित्यस्थितः स्फोटशब्दः स्वीकृतः। 'ध्वनति स्फोटं व्यनक्तीति ध्वनिरित्यर्थेनैते ध्वनयः तमेव नित्यस्थितं स्फोटशब्दं व्यञ्जन्ति, तथा च स्फुटति अर्थो यस्यमात् स स्फोटः इति व्याख्यया स्फोटरूपशब्दब्रह्मणैव वर्णार्थाः प्रकट्यन्ते। यथा वैयाकरणैः प्रधानभूतस्फोटस्याभिव्यक्तौ समर्था वर्णा 'ध्वनिरि' ति व्यवह्रियन्ते, तथैव 'ध्वन्यते व्यज्यतेऽस्मिन्निति व्याख्यया काव्यमर्मज्ञारपि वाच्यार्थस्यापेक्षया

NOTES

NOTES

व्यङ्ग्यार्थस्य प्रकाशकं शब्दार्थयुगलं काव्यं ध्वनिकाव्यमिति समुद्घोषितम्। अतोऽत्र व्यङ्ग्यार्थस्य प्राधान्याद् मम्मटेनोत्तमं काव्यमुररीकृतमिति।'

'यतः काव्यस्य प्रभेदा मुक्तकं संस्कृतप्राकृतापभ्रंशनिबद्धं, सन्दानितक-विशेषककलापककुलकानि, पर्यायबन्धः, परिकथा, खण्डकथा सकलकथे, सर्गबन्धः, अभिनेयार्थम् आख्यायिकाकथे इत्येवमादयः।' —*ध्वन्यालोक* ३.७

***यथा*– निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो**
**नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः।**

**मिथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे**
**वापीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिकम्॥ २॥**

अत्र तदन्तिकमेव रन्तुं गताऽसीति प्राधान्येनाऽधमपदेन व्यज्यते।

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृत स्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।**

*–(ध्वन्यालोक-१.१३)*

'प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरित व्यवहरन्ति। तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिच्यवाचकसंमिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्व-साम्याद् ध्वनिरित्युक्तः।' *–(ध्वन्यालोक-१.१३)*

**अन्वयः (१२)**–मिथ्यावादिनि दूति बान्धवजनस्य अज्ञातपीडागमे इतः वापीं स्नातुं गता असि, न पुनः तस्य अधमस्य अन्तिकम्, (यतोहि) निश्शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागः अधरः अनञ्जने नेत्रे दूरं तन्वी तव इयं तनुः पुलकिता।

**आनन्द टीका**–श्लोकेऽस्मिन् वाच्यार्थस्तु निषेधरूपो यथा–'वापीगमनं तदन्तिके च न गमनमिति विद्यते, परञ्चात्र

**(सू. ३) अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्।**

*अतादृशि वाच्यादनतिशायिनि। यथा–*

**ग्राम तरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम्।**
**पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया॥ ३॥**

NOTES

अत्र वञ्जुललतागृहे दत्तसङ्केता नागतेति व्यङ्ग्यं गुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारित्वात्।

व्यङ्ग्यार्थो विधिरूपस्तद्यथा–'वापीगमनं नैव तदन्तिकमेव गमनमिति।' अतोऽधमपदस्य वाच्यार्थो दुःखप्रयोजकत्वाद् व्यङ्ग्यार्थश्च परनायिकासंभोग-जन्यदुःखदायकत्वाच्च 'रन्तुं गतेति' व्यङ्ग्यार्थोऽधमपदेनैव व्यज्यते। चन्दनादीनां विनाशस्तु स्नानेनापि रमणेनापि वा भवितुं शक्नोति। चन्दनादीनामधमपदं विना स्वन्त्रतया रमणस्य नाभिव्यञ्जकत्वात तेनैव सह रमणीयार्थ प्रतिपादकत्वाच्च अधमपदस्यैवाऽत्र प्राधान्यम्।

**आनन्द टीका**–यत्र व्यङ्ग्यस्यार्थो वाच्यार्थस्यापेक्षया गौणः स्यात्, अपितु व्यङ्ग्यार्थाद् वाच्यार्थस्यैवातिचमत्कारित्वादिदं

**(सू.४) शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्॥ ५॥**

चित्रमिति गुणालङ्कारयुक्तम्। अव्यङ्ग्यमिति स्फुटप्रतीयमानार्थरहितम्। अवरमधमम्। यथा–

मध्यकाव्यं गुणीभूतव्यङ्ग्यकाव्यं वेति। 'ग्रामतरुणमि' त्युदाहरणे वञ्जुललतागृहे दत्तसङ्केताऽपि त्वं नागतेति व्यङ्ग्यार्थाद् 'मुखकान्ति नितरां मलिना जाते' ति वाच्यार्थस्य सहृदयाल्हादकत्वादिदं गुणीभूतव्यङ्ग्यकाव्यमिति।

**प्रकारोऽन्यो गुणीभूतव्यङ्ग्यः काव्यस्य दृश्यते।**
**यत्र व्यङ्ग्यान्वये वाच्यचारूत्वं स्यात् प्रकर्षवत्॥**

–*ध्वन्यालोक*–३.३५

**अन्वयः (सू.४)**–अव्यङ्ग्यं तु अवरं स्मृतम् (तत्) शब्दचित्रं वाच्यचित्रम्।

**स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्बुच्छटा**
**मूर्च्छन्मोहमर्षिहर्षविहितस्नानाह्निकाह्नायय वः।**

**भिधादुद्यदुदारदर्दुरदरी दीर्घादरिद्रद्रुम–**
**द्रोहोद्रेकमहोर्मिमेदुरमदामन्दाकिनी मन्दताम्॥ ४॥**

**आनन्द टीका**–व्यङ्ग्यार्थस्याऽस्फुटप्रतीत्यप्रतीतिवशाद् व्यङ्ग्यार्थविवक्षारहितं, रसभावादितात्पर्यशून्यं, वाच्यवाचकवैचित्र्यमात्र प्रदर्शकं, काव्यप्रतिकृतिवशा-दालेख्यमात्रमिव तच्चित्रकाव्यम्। माधुर्यादिगुणव्यञ्जकैर्यमकादिशब्दालङ्कारैः

NOTES

शब्दचमत्कारैकविवक्षायां शब्दचित्रम्, रूपकोत्प्रेक्षाद्यर्थालंकारैकविवक्षायामर्थचित्रञ्चेति द्विविधं चित्रकाव्यम्।

**गुणप्रधानभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थिते।**
**काव्ये उभे ततोऽन्यद्यत् तच्चित्रमभिधीयते॥**

**चित्रं शब्दार्थभेदेन, द्विविधं च व्यवस्थितम्।**
**तत्र किञ्चिच्छब्दचित्रं वाच्यचित्रमतः परम्॥**

*–ध्वन्यालोक–३, २, ४३*

**विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयाऽपि यम्॥**

**ससम्भ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियाऽमरावती॥ ५॥**

**इति प्रथम उल्लासः**

NOTES

**UNIT–II**

# इकाई–द्वितीय

# अथ द्वितीय उल्लासः

## ( शब्दार्थस्वरूप निर्णयात्मकः )

**क्रमेण शब्दार्थयोः स्वयपमाह**

**( सू.५ ) स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।**

**अत्रेति काव्ये। एषां स्वरूपं वक्ष्यते।**

**( सू.६ ) वाच्यादस्तदर्थाः स्युः–**

**वाच्य-लक्ष्य-व्यङ्ग्याः।**

**आनन्द टीका**–काव्ये वाचकलाक्षणिकव्यञ्जकोपाधिभेदभ्यः शब्दस्त्रिधा। तत्र वाचकशब्दाद वाच्यार्थो लाक्षणिकशब्दाल्लक्ष्यार्थस्तथा व्यञ्जकशब्दाद् व्यङ्ग्यार्थस्त्रयोऽर्थाः सन्ति। तद्यथा 'गङ्गायां घोषः' इत्यत्र गङ्गाप्रवाहो मुख्यार्थाद्वाच्यार्थः मुख्यार्थसम्बद्धाऽन्यार्थप्रकाशकस्तटविशषो लक्ष्यार्थस्तद्भिन्नशैत्यपावनत्वादिवि-लक्षणार्थस्य प्रतीतिकरो व्यङ्ग्यार्थः।

**( सू.७ ) तात्पर्यार्थोऽपि केषुचित्॥ ६॥**

आकाङ्क्षा-योग्यता-सन्निधिवशाद्वक्ष्यमाणस्वरूपाणां पदार्थानां समन्वये तात्पर्यार्थो विशेषवपुरपदार्थोऽपि, वाक्यार्थः समुल्लसतीत्यभिहितान्वयवादिनां मतम्। वाच्य एव वाक्यार्थ इत्यन्विताभिधानवादिनः।

**आनन्द टीका**–शब्दः केन विधिना स्वार्थं प्रकटयतीति शङ्कया व्याकरणन्यायमीमांसासाहित्यमर्मज्ञैः शब्दवृत्तयः कथिताः। मीमांसकानां तात्पर्यवृत्तिं विहाय तिस्रः शक्तयोऽभिधालक्षणाव्यञ्जनाख्याः प्रायः स्वीकृताः। तद्वृत्तिविहितं शब्दस्यार्थज्ञानमेव वाक्यार्थज्ञानमिति। पदानां पारस्परिकापेक्षाऽऽकाङ्क्षा, पदानां पारस्परिकान्वययोग्यता, पदानामेकबुद्ध्युपारूढतारूपसन्निधिवशात् पदानां समूहो

NOTES

वाक्यमिति। अभिहितान्वयवादिनां कुमारिलभट्टस्य मतानुयायिमीमां सकानां मतमस्ति यद् वाक्येऽभिधादिवृत्तिप्रकटितस्य पृथक्-पृथक् पदार्थज्ञानस्यानन्तरं तेषामर्थानां तात्पर्यवृत्त्या परस्परान्वयात् पदार्थभिन्नं तात्पर्यरूपं विलक्षणं वाक्यार्थज्ञानं भवति। अतः शब्दैरभिहितानां कथितानामर्थानां पश्चादन्वयादेतेऽभिहितान्वयवादिनः।

वाक्यप्रयुक्तेऽन्वितपदे हि सङ्केतग्रहाद् वाक्यश्रवणानन्तरं समन्वितार्थस्यैव प्रतीतिवशाच्च वाक्यार्थस्य सम्बन्धबोधाय हि तात्पर्या वृत्तिर्नानिवार्या, इति गुरुप्रभाकरस्य मतानुयायिमीमांसकाः। अर्थाद् वाक्ये पदान्यन्वितार्थमेव कथयन्तीति वादिनोऽन्विताभिधानवादिनः।

**( सू. ८ ) सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।**

**१. तत्र वाच्यस्य यथा–**

**मातर्गृहोपकरणमद्य खलु नास्तीति साधितं त्वया।**
**तद् भण किं करणीयमेवमेव न वासरः स्थायी।। ६।।**

**अत्र स्वैरविहारार्थिनीति व्यज्यते।**

**२. लक्ष्यस्य यथा**

**साधयन्ती सखि, सुभगं क्षणे क्षणे दूनासि मत्कृते।**
**सद्भावस्नेहकरणीयसदृशकं तावद्विरचितं त्वया।। ७।।**

अत्र मत्प्रियं रमयन्त्या त्वया शत्रुत्वमाचरितमिति लक्ष्यम्। तेन च कामुकविषयं सापराधत्वप्रकाशनं व्यङ्ग्यम्।

**आनन्द टीका**–आचार्यमम्मटः काव्ये वाचकलक्षकव्यञ्जकशब्दानां व्यञ्जकत्वं संकथ्य तेषां वाच्यलक्ष्यव्यङ्ग्यार्थेष्वपि वक्तृश्रोतृ-प्रकरणादिवैशिष्ट्याद् व्यञ्जकत्वं प्रतिपादयति।

**३. व्यङ्ग्यस्य यथा–**

**पश्य निश्चल निष्पन्दा विसिनीपत्रे राजते बलाका।**
**निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव।। ८।।**

अत्र निष्पन्दत्वेन आश्वस्तत्वं तेन च जनरहितत्वम्, अतः सङ्केतस्थानमेतदिति कयाचित् कञ्चित् प्रत्युच्यते। अथवा मिथ्या वदसि, न त्वमत्रागतोऽभूरिति व्यज्यते।

**वाचकादीनां क्रमेण स्वरूपमाह–**

**( सू. ९ ) साक्षात्सङ्केतितं योऽर्थमभिधत्ते स वाचकः॥ ७॥**

इहागृहीतङ्केतस्य शब्दस्यार्थप्रतीतेरभावात् संकेतसहाय एव शब्दोऽर्थविशेषं प्रतिपादयतीति यस्य यत्राव्यवधानेन सङ्केतो गृह्यते स तस्य वाचकः।

**आनन्द टीका–**'अभिधानाभिधेयनियमनियोगः सङ्केतः' इति न्यायाद्वा 'ईश्वरेच्छा सङ्केतः' इति प्राच्यन्यायाद्वा 'जनसामान्यकृतो हि सङ्केतः' इति नव्याद्वा 'पदमपदार्थयोः परस्पराध्यासरूपसङ्केतः' इति पतञ्जमिमान्याद्वा 'अस्माच्छब्दादयमर्थो बोद्धव्यः' तादृशी जनस्वीकृतिरेव सङ्केतः शक्तिर्वा। अतः प्रत्यक्षेण परम्परया वा सङ्केतं संगृह्य शब्दः सङ्केतितार्थमेव बोधयतीति सर्वसम्मतसिद्धान्ताच्छब्दः तस्यैव सङ्केतितार्थस्य वाचकः।

**( सू. १० ) सङ्केतितश्चतुर्भेदो जात्यादिर्जातिरेव वा।**

यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव तथाऽप्यानन्त्याद् व्यभिचाराच्च तत्र सङ्केतः कर्तुं न युज्यत इति गौः शुक्लश्चलो डित्थ इत्यादीनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव सङ्केतः।

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।**
**वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥**

**आनन्द टीका–**सङ्केतग्रहस्य विविधेषु वादेषु मीमांसकानां मतमस्ति यद् हिमपयःशङ्खादिषु पृथक्-पृथक् शुक्लत्वात्तत्र शुक्लत्वं जातिसामान्यं, गुडतण्डु-लादिषु पाकक्रियाभिन्नत्वादपि तत्र पाकत्वं जातिसामान्यं, बालयुवकवृद्धादिषु प्रतिक्षणं वृद्धिह्रासयुक्तत्वात्तत्र डित्थत्वं जातिसामान्यमिति 'नित्यमेकमनेकानुगतं सामान्यमिति' लक्षणेन गुणक्रियासंज्ञासु सर्वत्र सामान्यजातिरेव प्रवृत्तिनिमित्तमिति मीमांसकाः। अतएव मम्मटेनोक्तम्–यद्यपि गवा दुग्धप्रदानं घटेनैव जलाहरणादिकं कार्यं सिध्यतीति वस्तूनामर्थक्रियाकारितया व्यवहारे कार्यग्रहणाद् प्रवृत्तिः कार्यत्यागान्निवृत्तिश्च व्यक्तावेव दृश्यते, तथापि व्यक्तीनामनन्तत्वात्तासामेकदेश-स्थितिनिरसनात् सङ्केतग्रहापाये आनन्त्यदोषः। एकव्यक्तौ सङ्केतग्रहस्य पश्चादेव सर्वासु व्यवहारनिर्वाहश्चेदसङ्केतितासु तद्भिन्नास्वप्यर्थबोधाद् व्यभिचारदोषः। व्यक्तौ वा सङ्केतग्रहणाच्छब्दस्य जातिगुणक्रियासंज्ञात्मकाश्चतुर्विभागा असम्भवाः। सम्भवेऽपि वा घटकलशयोः पर्यायत्वात् सहप्रयोगोऽसम्भवः। अतो विषयविभागा-नामप्राप्तिदोषः। एतेषां त्रयाणां दोषाणां स्थितौ व्यक्तेश्चतुर्षूपाधिष्वेव सङ्केतः समीचीन इति वैयाकरणा मम्मटादयश्च।

NOTES

उपाधिश्च द्विविधः—वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च। वस्तुधर्मोऽपि द्विविधः—सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः—पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। तत्राद्यो जातिः। उक्तं हि वाक्यपदीये—'न हि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौरिति'। द्वितीयो गुणः शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते। साध्यः पूर्वापरीभूतावयवः क्रियारूपः। डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं, वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यत इति सोऽयं संज्ञारूपो यदृच्छात्मक इति। गौः शुक्लश्चो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्यकारः।

**सन्तोष टीका—**

**रूपरेखा द्वारा स्पष्टीकरणः-**




**'गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिरिति महाभाष्कारः।'**

**परमाण्वादीनां तु गुणमध्यपाठात् पारिभाषिकं गुणत्वम्।**

गुणक्रियायदृच्छानां वस्तुत एकरूपाणामप्याश्रयभेदाद् भेद इव लक्ष्यते यथैकस्य मुखस्य खड्ग मुकुरतैलाद्यालम्बनभेदात्।

हिमपयः शङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्ल इत्याद्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तच्छुक्लत्वादि सामान्यम्। गुडतण्डुला-दिपाकादिष्वेवमेव पाकत्वादि। बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये।

NOTES

तद्वान् अपोहो वा शब्दार्थः कैश्चिदुक्त इति ग्रन्थगौरवभयात् प्रकृतानुपयोगाच्च न दर्शितम्।

**(सू. ११) स मुख्योऽर्थस्तत्र मुख्यो व्यापारोऽस्याभिधोच्यते।। ८।।**

**स इति साक्षात्सङ्केतितः। अस्योति शब्दस्य।**

**(सू.१२) मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।**

**अन्योऽर्थो लक्ष्यते यत् सा लक्षणारोपिता क्रिया।। ९।।**

**आनन्द टीका**—वस्तुतः साक्षात्सङ्केतितार्थस्य बोधनाच्छब्दस्य मुख्यव्यापारोऽभिधा, परं मुख्यार्थानुपपन्नेऽपि मुख्यार्थसम्बद्धा रूढेः प्रयोजनाद्वा मुख्यभिन्नममुख्यं व्यापारं कल्पयित्री शब्दशक्तिर्लक्षणा। अतः शब्दस्य सान्तरार्थनिष्ठाव्यापारादयं लोकप्रथितव्यापारभिन्न आरोपितः शब्दव्यापारः। अत एव सा लक्षणारोपिता काल्पनिका ब्रह्मानुद्भाविता क्रिया। 'मुख्यार्थबाधादित्रयं हेतु' रिति ग्रन्थकारोक्त्या मुख्यार्थबाधो मुख्यार्थयोगस्तथा रूढिः किं वा प्रयोजनमिति समुदितत्वेन लक्षणाहेतुः।

तत्राऽन्वयानुपपत्तिरिति मुख्यार्थबाधस्याभिप्रायत्वात् 'काकेभ्यो दधि रक्ष्यतामि' त्यादौ लक्षणा न स्यात्, अतो 'दध्युपघातकेभ्यो दधि रक्ष्यतामि ति तात्पर्ये लक्षणाबीजत्वात् तात्पर्यानुपपत्तिरेव मुख्यार्थबाध इति नागेशभट्टः।' गङ्गायां घोष इत्यत्र गङ्गाप्रवाहे घोषाधारासम्भवाद् 'गङ्गातटे घोष' इति वक्तृतात्पर्ये लक्षणयाऽभीष्टार्थस्य प्रतीतिर्विद्यते।

मुख्यार्थेन सम्बद्धार्थस्य प्रतीतिरेव मुख्यार्थयोगः। लक्षणाया द्वितीयोऽयं हेतुः। मुख्यार्थेन सह सामीप्यादिसम्बन्धाद् मुख्यार्थद्वारा सम्बद्धार्थस्य मुख्यार्थभिन्नस्य प्रतीतिरेव लक्षणा। यथा 'गङ्गायां घोष' इत्यत्र गङ्गाशब्दस्य मुख्यार्थो जलप्रवाहो विद्यते, किञ्च जलप्रवाहे घोषवासासम्भवात् सामीप्यादिसम्बन्धाच्च गङ्गापदस्य तटरूपार्थे लक्षणा।

रूढिर्वा प्रयोजनं लक्षणायस्तृतीयो हेतुः। तत्र प्रसिद्धिः प्रयोगपरम्परा प्रवाहो वा रूढिः। प्रयोजनमिति शैत्यपावनत्वादिकमुद्देश्यम्। लक्षणायां तद्विविधहेतुविरहात् 'कर्माणि कुशल' इत्यत्र दक्षभिन्नार्थस्य 'गङ्गायां घोष' इत्यत्र दर्दुराद्यर्थस्यापि प्रतीतौ मम्मटस्य द्विविधहेतुस्वीकरणमुचितमेव।

कर्माणि कुशल इत्यादौ दर्भग्रहणाद्ययोगाद्, गङ्गायां घोष इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवाद्, मुख्यार्थस्य बाधे विवेचकत्वादौ सामीप्ये च सम्बन्धे, रूढितः प्रसिद्धेः तथा गङ्गातटे घोष इत्यादेः प्रयोगाद् येषां न तथा

NOTES

प्रतिपत्तिः तेषां पावनत्पादीनां धर्माणां तथा प्रतिपादनात्मनः प्रयोजनाच्च मुख्येनामुख्योऽर्थो लक्ष्यते यत् स आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा।

**( सू.१३ ) स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।**
**उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा॥ १० ॥**

**आनन्द टीका**—यदा कोऽपि शब्दः स्वमुख्यार्थस्य तात्पर्यसिद्धये स्वार्थमत्यजन्नपि स्वसम्बद्धमन्यार्थं गृह्णाति तत्र परार्थस्योपादानाद् ग्रहणादियमुपादानलक्षणा। स्वार्थापरित्यागेन परार्थलक्षणमुपादानमिति प्रदीपकारः। वैयाकरणानामियमेव 'अजहल्लक्षणा', 'अजहत्स्वार्था वृत्तिर्वा'। तद्यथा—'कुन्ताः प्रविशन्ती' त्यत्र चेतन धर्मस्याभावात् कुन्ताः प्रवेष्टुमशक्ताः, अतोऽत्र मुख्यार्थबाधे कुन्तशब्दः प्रवेशरूपस्य स्वार्थस्य सङ्गतये स्वसम्बद्धं कुन्तधारिणं पुरुषमाक्षिपति। तस्मादेव कुन्तधारिणः पुरुषाः प्रविशन्ती 'त्युपादानलक्षणा। अत्र कुन्तवत्तैक्ष्ण्यं कुन्तबहुलत्वं वा प्रयोजनमिति।'

यत्र शब्दः परार्थस्यान्वयसिद्धये स्वार्थ परित्यज्य परार्थस्योपस्थापको भवति तत्र परस्योपलक्षणादियं लक्षणलक्षणा। 'स्वार्थपरित्यागेन परार्थोपस्थापन्न लक्षणमिति प्रदीपकारः। अत एवेयं वैयाकरणानां 'जहल्लाक्षणा' जहत्स्वार्था वृत्तिर्वेति। तद्यथा—'गङ्गायां घोष' अत्यत्र गङ्गापदं परार्थस्य तटरूपार्थस्य सिद्धये प्रवाहरूपं स्वार्थ परित्यज्य तटरूपार्थमेवोपस्थापयति।

उपचारात् सादृश्याख्यसम्बन्धेनामिश्रितत्वाद् द्विविधेयं लक्षणा मम्मटेन शुद्धा कथिता। उपचारस्तावद्—'उपचारश्च सादृश्यसम्बन्धेन प्रवृत्तिः सादृश्यातिशयमहिम्ना भिन्नयोः पदार्थयोर्भेदप्रतीतिस्थगनं वे' ति प्रदीपकारः। अत उपचारमिश्रणाद् गौणी तद्भिन्नत्वाच्च शुद्धा लक्षणा कथिता। यथा 'सिंहो माणवक' इत्यत्र शौर्यक्रौर्यादि-गुणसादृश्याद् माणवके तदारोपत्वाच्च गौणी तथा 'गङ्गायां घोष' इत्यत्र प्रवाहटयोरभेदप्रतीतावपि शैत्यपावनप्रयोजनाच्छुद्धेयं लक्षणा।

'कुन्ताः प्रविशन्ति', 'यष्टयः प्रविशन्ति' इत्यादौ कुन्तादिभिरात्मनः प्रवेशसिद्ध्यर्थं स्वसंयोगिनः पुरुषा आक्षिप्यन्ते, तत उपादानेनेयं लक्षणा।

'गौरनुबन्ध्यः' इत्यादौ श्रुतिचोदितमनुबन्धनं कथं मे स्यादिति जात्या व्यक्तिराक्षिप्यते, न तु शब्देनोच्यते –'विशेष्यं नाभिधा गच्छेत् क्षीणशक्तिर्विशेषणे' इति न्यायादित्युपादानलक्षणा तु नोदाहर्त्तव्या। न ह्यत्र प्रयोजनमस्ति न वा रूढिरियम्। व्यक्त्यविनाभावित्वात्तु जात्या व्यक्तिराक्षिप्यते, यथा क्रियतामित्यत्र कर्ता, कुर्वित्यत्र कर्म, प्रविश पिण्डीमित्यादौ गृहं भक्षयेत्यादि च।

NOTES

पीनो देवदत्तो दिवा न भुङ्क्ते इत्यत्र च रात्रिभोजनं न लक्ष्यते, श्रुतार्थापत्तेरर्थापत्तेर्वा तस्य विषयत्वात्।

गङ्गायां घोष इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति, इत्येवमादौ लक्षणेनैषा लक्षणा।

उभयरूपाचेयं शुद्धा उपचारेणामिश्रितत्त्वात्। अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम्। तटादीनां गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः। गङ्गासम्बन्धमात्रप्रतीतौ तु गङ्गातटे घोष इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः।

**(सू.१४) सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा।**

आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते, सा लक्षणा सारोपा।

**(सू.१५) विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात्साध्यवसानिका॥ ११॥**

विषयिणाऽऽरोप्यमाणेनान्तः कृते निगीर्णे, अन्यस्मिन्नारोपविषये सति साध्यवसाना स्यात्।

**(सू.१६) भेदाविमौ च सादृश्यात्सम्बन्धान्तरतस्था।**
**गोणौ शुद्धौ च विज्ञेयौ-**

इमावारोपाध्यवसानरूपौ सादृश्यहेतू भेदौ 'गौर्वाहीक' इत्यत्र 'गौरयम्' इत्यत्र च।

**आदन्द टीका**—सरोपसाध्यवसानलक्षयोर्गोणौशुद्धौ च द्वौ भेदौ स्तः। तत्र सादृश्यसम्बन्धाद् गौणी सारोपा गौणी सध्यवसाना अत्र हि स्वार्थसहचारिणो गुणा जाड्यमान्द्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्तिनिमित्तत्वमुपयान्ति, इति केचित्। स्वार्थसहचारिगुणाभेदेन परार्थगता गुणा एव लक्ष्यन्ते, न तु परार्थोऽभिधीयते, इत्यन्ये। साधारणगुणाश्रयत्वेन परार्थ एव लक्ष्यते, इत्यपरे।

च लक्षणा, तथा सादृश्येतरसम्बन्धाद् जन्यजनकतादर्थ्यादीनां सम्बन्धाच्च शुद्धा साध्यवसाना च लक्षणा भवति। तत्र गौणी सारोपा तथा 'गौर्वाहीक' इत्यत्र बाल्हीकदेशनिवासी वा बहिर्भवो वाहीक इति शास्त्रीयाचाराद्वहिर्भूर्ताऽसभ्योऽ-संस्कृतनश्चेति व्युत्पत्त्या वाहीको बलीवर्दो मूर्खो वाऽस्तीत्यर्थः। अतो

जाड्यादिगुणसादृश्याद् वाहीक शब्दे लक्षणारोपत्वाच्च गौणी सारोपा ज्ञेया, तथैवाध्यवसानाद् 'गौरयम्' इत्यत्र गौणी साध्यवसाना लक्षणा विज्ञेया। शुद्धा

NOTES

सारोपा यथा "आयुर्घृतम्" इत्यत्र घृतं कारणमायुः कार्यञ्चेति कार्यकारणभावसम्बन्धाद् आरोप्यमाणारोपविषययोः स्वस्वरूपकथनाच्चेयं शुद्धा सारोपा, तथैव 'आयुरेवेदम्' इत्यत्र शुद्धा साध्यवसाना लक्षणा स्वीकरणीया।

**उक्तञ्चान्यत्र–**

**अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते।**
**लक्ष्यमाणगुणैर्योगाद् वृत्तेरिष्टा तु गौणता॥**

अविनाभावोऽत्र सम्बन्धमात्रम्, न तु नान्तरीयकत्वम्। तत्त्वे कि मञ्चाः क्रोशन्तीत्यादौ न लक्षणा स्यात्। अविनाभावे चाक्षेपेणैव सिद्धेर्लक्षणाया नोपयोग इत्युक्तम्।

"आयुर्घृतम्" आयुरेवेदमित्यादौ च सादृश्यादन्यत्कार्यकारणभावादिसम्बन्धान्तरम्। एवमादौ च कार्यकारणभावादिलक्षणपूर्वे, आरोपाध्यवसाने।

अत्र गौणभेदयोर्भेदेऽपि ताद्रूप्यप्रतीतिः सर्वथैवा भेदावगमश्च प्रयोजनम्। शुद्धभेदयोस्त्वन्यवैलक्षण्येनाव्यभिचारेण च कार्यकारित्वादि।

क्वचित् तादर्थ्यादुपचारः, यथा–इन्द्रार्था स्थूणा, इन्द्रः। क्वचित् स्वस्वामिभावाद् यथा राजकीयः पुरुषो राजा। क्वचिदवयवावयविभवाद्, यथा–अग्रहस्त इत्यत्राग्रमात्रेऽवयवे हस्तः। क्वचित् तात्कर्म्याद्, यथा–अतक्षा तक्षा।

**(सू.-१७) लक्षणा तेन षड्विधा॥ २॥**
**आद्यभेदाभ्यां सह।**

**(सू.-१८) व्यङ्ग्येन रहिता रूढौ सहिता तु प्रयोजने।**
**प्रयोजनं हि व्यञ्जनव्यापारगम्यमेव।**

**(सू.-१९) तच्च गूढमगूढं वा**
**तच्चेति व्यङ्ग्यम्।**

**आनन्द टीका–**आचार्यमम्मटेन प्रथमतो लक्षणा षड्विधा प्रतिपादिता। अत्र व्यञ्जनादृष्ट्या लक्षणा त्रिविधा प्रोक्ता। रूढिवशादव्यङ्ग्या लक्षणा प्रयोजनवशाच्च सव्यङ्ग्या लक्षणा। सव्यङ्ग्यलक्षणायामपि तच्च व्यङ्ग्यं सहृदयहृदयमात्रसंवेद्याद् गूढं सामान्यजनसंवेदनाच्चागूढञ्चेति द्विविधं कथितम्।

**गूढं यथा–**

**मुखं विकसितस्मितं वशितवक्रिमप्रेक्षितं**
**समुच्छलितविभ्रमा गतिरपास्तसंस्था मतिः।**

NOTES

उरो मुकुलितस्तनं जघनमसम्बद्धोद्‌धुरं
बतेन्दुवदनातनौ तरुणिमोद्‌गमो मोदते॥ ९ ॥

**अगूढं यथा–**

**श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम्।**
**उपदिशति कामिनीनां यौवनमद एव ललितानि॥ १०॥**

**( सू.-२० ) तदेषा कथिता त्रिधा॥ १३॥**

**अव्यङ्‌ग्या, गूढव्यङ्‌ग्या, अगूढव्यङ्‌ग्या च।**

**आनन्द टीका–**आचार्यमम्मटेन 'लक्षणा तेन षड्‌विधे' ति संकथ्य काव्योत्कृष्टत्वं व्यङ्‌ग्यार्थायत्तमिति मत्वा व्यङ्‌ग्यार्थदृष्ट्याऽत्र लक्षणा त्रिधा कथिता-अव्यङ्‌ग्या, अगूढव्यङ्‌ग्या, च। प्रदीपकारस्यानुसारेणोपाधिवशाल्लक्षणा षड्‌विधा व्यञ्जनावशाच्च त्रिधेति सम्मिल्य नवविधा लक्षणा मम्मटेनाङ्गीकृता। परं व्यङ्‌ग्यरहिता रूढिलक्षणैकविधा, पूर्वोक्ता षड्‌विधा प्रयोजनवती लक्षणा च गूढगूढव्यङ्‌ग्यभेदाभ्यां द्वादशविधेति मत्वा मम्मटसम्मत्या त्रयोदशविधा लक्षणा भवतीति नरसिंहठक्कुरः।

**( सू.२१ ) तद्‌भूर्लाक्षणिरकः-**

**शब्द इति सम्बध्यते। तद्‌भूस्तदाश्रयः।**

**( सू.२२ ) तत्र व्यापारो व्यञ्जनात्मकः।**

कुत इत्याह–

**( सू.२३ ) यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते॥ १४ ॥**

**फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया**

प्रयोजनप्रतिपिपादयिषया यत्र लक्षणया शब्दप्रयोगस्तत्र नान्यतस्तत्प्रतीतिः, अपि तु तस्मादेव शब्दात्। न चात्र व्यञ्जनादृतेऽन्यो व्यापारः।

**आनन्द टीका–**लक्षणाश्रयभूतो लाक्षणिकः शब्दः। लाक्षणिकशब्दे च व्यङ्‌ग्यार्थबोधको व्यापारो व्यञ्जनात्मकः। 'गङ्गायां घोष' इत्यत्र लाक्षणिकशब्दस्य प्रयोगः शैत्यपावनत्वादिप्रयोजनस्य प्रतीतिमुत्पादयितुं क्रियते। अतो मात्रलाक्षणिक-शब्दगम्ये तत्प्रयोजने व्यञ्जनाव्यापारो हि मुख्यतमो न त्वनुमानादयः। इदमेव प्रयोजनं व्यञ्जनया गूढगूढव्यङ्‌ग्यत्वेन प्रतीयते। अतो लक्षणामूला व्यञ्जनाऽनिवार्या।

NOTES

**( सू.२४ ) नाभिधा समयाभावात्।**

'गङ्गायां घोष' इत्यादौ ये पावनत्वादयो धर्मास्तटादौ प्रतीयन्ते न तत्र गङ्गादिशब्दा: सङ्केतिता:।

**( सू.२५ ) हेत्वभावान्न लक्षणा॥ १५ ॥**

मुख्यार्थबाधादित्रयं हेतु:।

तथा च-

**( सू.२६ ) लक्ष्यं न मुख्यं नाप्यत्र बाधो योग: फलेन नो।**
**न प्रयोजनमेतस्मिन् न च शब्द: स्खलद्गति:॥ १६ ॥**

**आनन्द टीका**–'अस्माच्छब्दादयमर्थो बोद्धव्य:' तादृशी जनस्वीकृतिरेव सङ्केत:। अत: प्रत्यक्षेण परम्परया वा सङ्केतं संगृह्य शब्द: सङ्केतितार्थमेव बोधयतीति सामान्य: सिद्धान्त:। तस्यैव सङ्केतितार्थस्य मुख्यार्थस्य बोधिका शब्दशक्तिरभिधा। अत: 'गङ्गायां घोष' इत्यत्र तटादौ ये पावनत्वादयो धर्मा: प्रयोजनत्वेन प्रतीयन्ते, यत्र नाभिधा गङ्गाशब्दस्य सङ्केताभावात्। वस्तुतो गङ्गाशब्दो लक्षणया तटाद्यर्थं बोधयति, तटे च शैत्यपावनत्वादीनां ज्ञानमेव लक्षणाया: प्रयोजनम्। अत: तत्प्रयोजनं व्यञ्जनाव्यापारेणैव सम्भवं सङ्केताभावाद् न त्वभिधया।

**यथा**–गङ्गाशब्द: स्रोतसि सबाध इति तटं लक्षयति, तद्वत् यदि तटेऽपि सबाध: स्यात् तत् प्रयोजनं लक्षयेत्। न च तटं मुख्योऽर्थ:। नाप्यत्र बाध:। न च गङ्गाशब्दार्थस्य तटस्य पावनत्वाद्यैर्लक्षणीयै: सम्बन्ध:। नापि प्रयोजने लक्ष्ये किञ्चित् प्रयोजनम्। नापि गङ्गाशब्दस्तटमिव प्रयोजनं प्रतिपादयितुमसमर्थ:।

**आनन्द टीका**–लक्षणाया: त्रिविधहेतव: - मुख्यार्थबाधो मुख्यार्थयोगो रूढि: प्रयोजनञ्च। अत्र पावनत्वादिप्रयोजने त्रिविधहेतवो न विद्यन्ते। तद्यथा-गङ्गाशब्द: प्रवाहरूपं मुख्यार्थं बाध्य लक्षणया तटाद्यर्थं बोधयति। अतोऽत्र न तु तटाद्यर्थो मुख्यार्थो न च तस्य बाध:। बाधेऽपि चेत् शैत्यपावनत्वादौ लक्षणाभ्युपगमादसम्भव:। मुख्यार्थयोग: – पावनत्वादिलक्ष्यार्थश्चेत्तर्हि तटादिलक्ष्यार्थेन गङ्गाशब्दस्य सम्बन्धोऽपि भवेत:, परञ्च पावनत्वादीनां तु साक्षात्सम्बन्ध: प्रवाहेणैव विद्यमानाद् मुख्यार्थयोगोऽप्यसम्भव:। रूढि: किंवा प्रयोजनम्-स्पष्टमेव रूढिस्त्वत्र नहि विद्यते। पावनत्वादिप्रयोजनस्य लक्ष्यार्थे सति किमप्यपरं प्रयोजनमस्य लक्ष्यार्थस्य नूनमेव भवितव्यम्। परञ्चात्र न किमप्यपरं प्रयोजनम्।

NOTES

स्खलद्गतिः- यथा गङ्गाशब्दः तटाद्यर्थस्य लक्ष्यार्थस्य प्रतिपादने विफलसामर्थ्यो भूत्वा लक्षणयैव तटं बोधयति तथा प्रयोजनस्य प्रतिपादने नैवाक्षमोऽपितु सक्षमोऽस्ति। अतः प्रयोजनस्य प्रतिपादने लक्षणाऽपि हेत्वभावान्न समर्था।

**( सू.२७ ) एवमप्यनवस्था स्याद् या मूलक्षयकारिणी।**

एवमपि प्रयोजनं चेल्लक्ष्यते तत् प्रयोजनान्तरेण, तदपि प्रयोजनान्तरेणेति प्रकृताप्रतीतिकृत् अनवस्था भवेत्।

ननु पावनत्वादिधर्मयुक्तमेव तटं लक्ष्यते, गङ्गायास्तटे घोष इत्यतोऽधिकस्यार्थस्य प्रतीतिश्च प्रयोजनामिति विशिष्टे लक्षणा, तत्किं व्यञ्जनयेत्याह-

**( सू.२८ ) प्रयोजनेन सहितं लक्षणीयं न युज्यते॥ १७ ॥**

कुत इत्याह

**( सू.२९ ) ज्ञानस्य विषयो ह्यन्यः फलमन्यदुदाहृतम्।**

प्रत्याक्षादेर्नीलादिविषयः, फलं तु प्रकटता संवित्तिर्वा

**आनन्द टीका**–लक्षणायाः शैत्यपावनत्वमतिशयप्रयोजनं विद्यते, तदेव चेल्लक्ष्यार्थः स्वीक्रियते तत्तु प्रथमस्यास्य प्रयोजनरूपलक्ष्यार्थस्य किमप्यपरं प्रयोजनम्, अपरप्रयोजनस्यापि तृतीयं प्रयोजनं नूनमेव स्वीकरणीयम्। एवं प्रयोजनशृङ्ख्ला त्वस्थिरदोषत्वात् तटाद्यर्थं पावनत्वादिकं वा प्रस्तुतार्थप्रतीतिमेव नंक्ष्यति।

**आनन्द टीका**–ननु 'गङ्गायास्तटे घोषः' अस्यापेक्षया शैत्यपावनत्वादिविशिष्टस्य तटाद्यर्थस्य प्रतीतिरेव लक्षणायाः

**( सू.३० ) विशिष्टे लक्षणा नैवम्**

व्याख्यातम्

**( सू.३१ ) विशेषाः स्युस्तु लक्षिते॥ १९॥**

तटादौ ये विशेषाः पावनत्वादयस्ते चाभिधा-तात्पर्य-लक्षणाभ्यो व्यापारान्तरेण गम्याः। तच्च व्यञ्जन-ध्वनन-द्योतनादिशब्दवाच्यमवश्यमेषितव्यम्।

प्रयोजनं विशिष्टञ्चेद्, व्यञ्जनत्वं नानिवार्यमिति मम्मटेन पूर्वपक्षः समाधीयते यत् - तटाद्यर्थस्तु लक्षणाजन्यज्ञानस्य विषयस्तथा शैत्यपावनत्वं लक्षणाजन्यज्ञानस्य फलमिति। विषयफलयोश्च ज्ञानमपि पृथग्भूत्वा पौर्वापर्यक्रमेण जायते। यथा 'अयं घट' इत्यत्र ज्ञानस्य विषयो घटस्तथा ज्ञानस्य फलमहं घटं जानामीति

NOTES

'ज्ञातता' नामको धर्मोऽस्तीति मीमांसकाः। न्यायमतानुसारेण 'अयं घट' इत्यत्र प्रथमस्तु ज्ञानस्य विषये घटो ज्ञायते ततश्च घटमहं जानामीत्यनुव्यवसायात्मकं ज्ञानस्य फलं प्रतीयते। अत एव शैत्यपावनत्वादिविशिष्टे तटार्थेऽपि विशिष्टा लक्षणा नैव प्रतिश्रवार्हा।

**एवं लक्षणामूलं व्यञ्जकत्वमुक्तम्। अभिधामूलं त्वाह-**

**( सू.३२ ) अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते।**
**संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम्॥ १९॥**

**आनन्द टीका**–लाक्षणिकशब्दवद् वाचकशब्दोऽपि व्यञ्जनया विशेषार्थस्य बोधकः। वर्णसमूहात्मकाः शब्दाः कुत्रचित् प्रवृतिनिमित्तभेदैर्विविधार्थशक्तिसम्पन्ना जायन्ते। वक्तृभिः तात्पर्यार्थे हि शब्दार्थ उपस्थीयते। अतो यदा वाच्यार्थस्य सङ्केतितार्थे नियन्त्रिते सति संयोगाद्यैर्वाच्यार्थभिन्नार्थस्य प्रतीतिर्जायते सा प्रत्यायिका शक्तिर्व्यञ्जना नाम। अनेकार्थकः शब्दो हि व्यञ्जकः। अतः संयोगाद्यैरपरार्थस्य व्यञ्जनाऽभिधाश्रयीति व्यञ्जनाऽभिधामूला।

**संयोगो विप्रयोगश्च साहचर्यं विरोधिताः**
**अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः।**
**सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः।**

इत्युक्तदिशा सशङ्खचक्रो हरिः, अशङ्खचक्रो हरिरित्युच्यते। रामलक्षणाविति दाशरथी। रामार्जुनगतिस्तयोरिति भार्गवकार्त्तवीर्ययोः। स्थाणुं भज भवच्छिदे, इति हरे। सर्वं जानाति देव इति युष्मदर्थे। कुपितो मकरध्वज इति कामे। देवस्य पुरारातेरिति शम्भौ। मधुना मत्तः कोकिल इति वसन्ते। पातु वो दयिता मुखमिति साम्मुख्ये। भात्यत्र परमेश्वर इति राजधानीरूपाद्देशाद्राजनि। चित्रभानुर्विभातीति दिने रवौ, रात्रौ वह्नौ। मित्रं भातीति सुहृदि, मित्रो भातीति रवौ। इन्द्रशत्रुरित्यादौ वेद एव, न काव्ये स्वरो विशेषप्रतीतिकृत्।

**आदिग्रहणात्-**

**एतावन्मात्रस्तनिका एतावन्मात्राभ्यामक्षिपत्राभ्याम्।**
**एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः॥ ११ ॥**

**इत्यादावभिनयादयः**

**उदात्तश्चानुदात्तश्च स्वरितः कम्पितस्तथा।**
**वर्णाश्चत्वार एव स्युः पाठ्ययोगे तपोधनाः॥**

तत्र हास्यश्रृङ्गारयोः स्वरितोदात्तैर्वीररौद्राद्भुतेषु उदात्तकम्पितैः करुणवात्सल्य-भयानकेषु अनुदात्तस्वरितकम्पितैर्वर्णैः पाठ्यमुपपादयेत् (नाट्यशास्त्र १९.४३)।

इत्थं संयोगादिभिरर्थान्तराभिधायकत्वे निवारितेऽप्यनेकार्थस्य शब्दस्य यत्क्वचिदर्थान्तरप्रतिपादनं तत्र नाभिधा नियमनात्तस्याः। न च लक्षणा मुख्यार्थबाधाद्यभावात्, अपितु अञ्जनं व्यञ्जमेव व्यापारः।

**यथा–**

**भद्रात्मनोदुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसङ्ग्रहस्य।**
**यस्यानुपप्लवगतेः परवारणस्य दानाम्बुसेकसुभगः सततं करोऽभूत्॥ १२॥**

**(सु.३३) तद्युक्तो व्यञ्जकः शब्दः-**

**तद्युक्तो व्यञ्जनयुक्तः।**

**(सू.३४) यत्सोऽर्थान्तरयुक् तथा।**

**अर्थोऽपि व्यञ्जकस्तत्र सहकारितया मतः॥ २०॥**

**तथेति व्यञ्जकः।**

**गुरुपरतन्त्रतया बत दूरतरं देशमुद्यतो गन्तुम्।**
**अलिकुलकोकिलललिते नैष्यति सखि, सुरभिसमयेऽसौ॥**

अत्र नैष्यति, अपि तर्हि एष्यत्येवेति काक्वा व्यज्यते। चेष्टावैशिष्ट्ये यथा–

'संकेतकालमनसं विटं ज्ञात्वा विदग्धया। हसन्नेत्रार्पिकूतं लीलापद्मं निमीलितम्।।' अत्र संध्या संकेतकाल इति पद्मनिमीलनादिचेष्टया कयाचिद्द्योत्यते। एवं वक्त्रादीनां व्यस्तसमस्तानां वैशिष्ट्ये बोद्धव्यम्।

**त्रैविध्यादियमर्थानां प्रत्येकं त्रिविधा मता॥ १७॥**

अर्थानां वाच्यलक्ष्यव्यङ्ग्यत्वेन त्रिरूपतया सर्वा अप्यनन्तरोक्ता व्यञ्जनास्त्रिविधाः। तत्र वाच्यार्थस्य व्यञ्जना यथा–'कालो मधुः'–इत्यादि। लक्ष्यार्थस्य यथा–'निःशेषच्युतचन्दनं'–इत्यादि। व्यङ्ग्यार्थस्य यथा–'उअ णिञ्चल'–इत्यादि। प्रकृतिप्रत्ययादिव्यञ्जकत्वं तु प्रपञ्चयिष्यते।

**शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।**
**एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥ १८॥**

NOTES

NOTES

यतः शब्दो व्यञ्जकत्वेऽर्थान्तरमपेक्षते, अर्थोऽपि शब्दम्, तदेकस्य व्यञ्जकत्वेऽन्यस्य सहकारितावश्यमङ्गीकर्तव्या।

**अभिधादित्रयोपाधिवैशिष्ट्यात्त्रिविधो मतः।**
**शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा॥ १९॥**

अभिधोपाधिको वाचकः लक्षणोपाधिको लक्षकः। व्यञ्जनोपाधिको व्यञ्जकः।

किञ्च

**तात्पर्याख्यां वृत्तिमाहुः पदार्थान्वयबोधने।**
**तात्पर्यार्थं तदर्थं च वाक्यं तद्बोधकं परे॥ २०॥**

अभिधाया एकैकपदार्थबोधनविरमाद् वाक्यार्थरूपस्य पदार्थान्वयस्य बोधिका तात्पर्यं नाम वृत्तिः, तदर्थश्च तात्पर्याथः। तद्बोधकं च वाक्यमित्यभिहितान्वयवादिनां मतम्।।

**॥ इति काव्यप्रकाशे शब्दार्थस्वरूपनिर्णयो नाम द्वितीय उल्लासः॥**

# UNIT–III

# इकाई–तृतीय

# साहित्यदर्पणे

**अथ कोऽयं रस इत्युच्यते-**

**विभावेनानुभावेन व्यक्तः संचारिणा तथा।**
**रसतामेति रत्यादिः स्थायिभावः सचेतसाम्॥ १॥**

विभावादयो वक्ष्यन्ते। सात्त्विकाश्चानुभावरूपत्वान्नं पृथगुक्ताः। व्यक्तो दध्यादिन्यायेन रूपान्तरपरिणतो व्यक्तीकृत एव रसः। न तु दीपेन घट इव पूर्वसिद्धो व्यज्यते। तदुक्तं लोचनकारैः–'रसाः प्रतीयन्त इति त्वोदनं पचतीतिवद् व्यवहारः' इति। अत्र च रत्यादिपदोपादानादेव स्थायित्वे प्राप्ते पुनः स्थायिपदोपादानं रत्यादीनामपि रसान्तरेष्वस्थायित्वप्रतिपादनार्थम्। ततश्च हासक्रोधादयःशृङ्गारवीरादौ व्यभिचारिणे एव। तदुक्तम्–

**'रसावस्थः परं भावः स्थायितां प्रतिपद्यते' इति।**

**अस्य स्वरूपकथनगर्भ आस्वादनप्रकारः कथ्यते–**

**सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।**
**वेद्यान्तरस्पर्शशून्या ब्रह्मास्वादसहोदरः॥ २॥**

**लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः।**
**स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥ ३॥**

"रजस्तमोभ्यामस्पृष्टं मनः सत्त्वमिहोच्यते" इत्युक्तप्रकारो बाह्यमेयविमुखतापादकः कश्चानान्तरो धर्मः सत्त्वम्। तस्योद्रेको रजस्तमसी अभिभूय आविर्भावः। तत्र हेतुस्तथाविधालौकिककाव्यार्थपरिशीलनम्। अखण्ड इत्येक एवायं विभावादिरत्यादिप्रकाशसुखचमत्कारात्मकः। अत्र हेतुं वक्ष्यामः–स्वप्रकाशत्वाद्यपि वक्ष्यमाणरीत्या। चिन्मय इति स्वरूपार्थे मयट्। चमत्कारश्चित्तविस्ताररूपो विस्मयापरपर्यायः। तत्प्राणत्वं चास्मद्वृद्धप्रपितामहसहृदयगोष्ठीगरिष्ठकविपण्डित–

NOTES

मुख्यश्रीमन्नारायणपादैरुक्तम्। तदाह धर्मदत्तः स्वग्रन्थे–

*'रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।*
*तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।*
*तस्माददद्भुतमेवाह कृती नारायणो रसम्।।'* इति ।

कैश्चिदिति प्राक्तनपुण्यशालिभिः। यदुक्तम्–

*'पुण्यवन्तः प्रमिणवन्ति योगिवद्रससन्ततिम्।'* इति ।

यद्यपि 'स्वादः काव्यार्थसंभेदादात्मानन्दसमुद्भवः' इत्युक्तदिशा रसस्यास्वादान-तिरिक्तत्वम्, तथापि 'रसः स्वाद्यते' इति काल्पनिकं भेदमुरीकृत्य, कर्मकर्तरि वा प्रयोगः। तदुक्तम्–'रस्यमानतामात्रसारत्वात्प्रकाशशरीरादनन्य एव हि रसः' इति। एवमन्यत्राप्येवंविधस्थलेषूपचारेण प्रयोगो ज्ञेयः।

नन्वेतावता रसस्याज्ञेयत्वमुक्तं भवति। व्यञ्जनायाश्च ज्ञानविशेषत्वाद् द्वयोरैक्यमापतितम्। ततश्च–

'स्वज्ञानेनान्यधीहेतुः सिद्धेऽर्थे व्यञ्जको मतः। यथा दीपोऽन्यथाभावे को विशेषोऽस्य कारकात्।।'

ननु विभावादिमेलकाज्जायमानानन्दसंवलितमिलितविभावादिसंविद्रस इत्युक्तं भवति। विभावादीनां मेलकश्च विभावादिविशिष्टवैशिष्ट्यावगाह्येकज्ञान-विषयत्वमित्यवश्यं वाच्यम्। प्रकारन्तरेण तन्निरूपणस्याशक्यत्वात्। तादृशज्ञानं च विभावदीनां प्रत्येकज्ञानादेव भवति। एवं च ताध्शज्ञानानन्तरं रसास्वादः कथं जायतामुपायाभावादित्यभिप्रायेण शङ्कते–नन्विते। एतावता रसस्य विभावादिसमुदाय-प्रकारस्य रसत्वाङ्गाकारेण। अज्ञेयत्वमिति। उपायत्वाभावादित्यर्थः। स्वप्रकाशस्य स्वानुत्पत्त्यैवाज्ञेयत्वमिति भावः। ननु व्यञ्जनयैव रसास्वादो जायतामित्यत आह–व्यञ्जनायाश्चेति। विभावादिसमुदायसामर्थ्यस्य चेत्यर्थः। ज्ञानविशेषत्वाद् विशिष्टवैशिष्ट्यज्ञानरूपत्वात्।

इत्युक्तदिशा घटप्रदीपवत् व्यङ्ग्यव्यञ्जकयोः पार्थक्यमेवेति कथं रसस्य व्यङ्ग्यतेति चेत्, सत्यमुक्तम्। अत एवाहुः–'विलक्षण एवायं कृतिज्ञप्तिभेदेभ्यः स्वादनाख्यः कश्चिद् व्यापारः' इति। अत एव हि रसनास्वादनचमत्करणदयो विलक्षणा एव व्यपदेशा इति। अभिधादिविलक्षणेव्यापारमात्रप्रसाधनग्रहिलैरस्माभी रसादीनां व्यङ्ग्यत्वमुक्तं भवतीति।

NOTES

ननु तर्हि करुणादीनां रसानां दुःखमयत्वाद्रसत्वं न स्यादित्युच्यते–

**करुणादावपि रसे जायते यत्परं सुखम्॥ ४॥**

**सचेतसामनुभवः प्रमाणं तत्र केवलम्।**

आदिशब्दाद् बीभत्सभयानकादयः। तथाऽप्यहृदयानां मुखमुद्रणाय पक्षान्तर-मुच्यते–

**किंच तेषु यदा दुःखं न कोऽपि स्यात्तदुन्मुखः॥ ५॥**

नहि कश्चित्सचेतन आत्मनो दुःखाय प्रवर्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात्सुखमयत्वमेव। उपपत्त्यन्तरमाह–

**तथा रामायणादीनां भविता दुःखहेतुता।**

करुणरसस्य दुःखहेतुत्वे करुणरसप्रधानरामायणादिप्रबन्धानामपि दुःखहेतुता-प्रसङ्गः स्यात ननु कथं दुःखकारणेभ्यः सुखोत्पत्तिरित्याह–

**हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्॥ ६॥**

**शोकहर्षादयो लोके जायन्तां नाम लौकिकाः।**
**अलौकिकविभावत्वं प्राप्तेभ्यः काव्यसंश्रयात्॥ ७॥**

**सुखं संजायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः।**

ये खलु वनवासादयो लोके 'दुःखकारणानि' इत्युच्यन्ते त एव हि काव्यनाट्यसमर्पिता अलौकिकविभावनव्यापारवत्तया कारणशब्दवाच्यं विहायालौकिकविभावशब्दवाच्यत्वं भजन्ते। तेभ्यश्च सुरते दन्तघातादिभ्य इव सुखमेव जायते। अतश्च 'लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते' इति लोक एव प्रतिनियमः। काव्ये पुनः 'सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते' इति नियमान्न कश्चिद्दोषः।

कथं तर्हि हरिश्चन्द्रादिचरितस्य काव्यनाट्ययोरपि दर्शनश्रवणाभ्यामश्रुपातादयो जायन्त इत्युच्यते–

**अश्रुपातादयस्तद्वद् द्रुतत्वाञ्चेतसो मताः॥ ८॥**

तर्हि कथं काव्यतः सर्वेषामीदृशी रसाभिव्यक्तिर्न जायत इत्यत आह–

**न जायते तदास्वादो विना रत्यादिवासनाम्।**

वासना चेदानीन्तनी प्राक्तनी च रसास्वादहेतुः। तत्र यद्याद्या न स्यात्तदा श्रोत्रियजरन्मीमांसकादीनामपि सा स्यात्। यदि द्वितीया न स्यात्तदा यद्रागिणामपि

NOTES

केषांचिद्रसोद्बोधो न दृश्यते तन्न स्यात्। उक्तं च धर्मदत्तेन–

*'सवासनानां सभ्यानां रसस्यास्वादनं भवेत्।*
*निर्वासनास्तु रङ्गान्तः काष्ठकुड्याश्मसंनिभाः।।'* इति।

ननु कथं रामादिरत्याद्युद्बोधकारणैः सामाजिकरत्याद्युद्बोध इत्युच्यते–

**व्यापारोऽस्ति विभावादेर्नाम्ना साधारणी कृतिः।। ९।।**

**तत्प्रभावेण, यस्यासन्पाथोधिप्लवनादयः।**
**प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते।। १०।।**

ननु कथं मनुष्यमात्रस्य समुद्रलङ्घनादावुत्साहोद्बोध इत्युच्यते–

**उत्साहादिसमुद्बोधः साधारण्याभिमानतः।**
**नृणामपि समुद्रादिलङ्घनादौ न दुष्यति।। ११।।**

रत्यादयोऽपि साधारण्येनैव प्रतीयन्त इत्याह–

**साधारण्येन रत्यादिरपि तद्वत्प्रतीयते।**

रत्यादेरपि स्वात्मगतत्वेन प्रतीतौ सभ्यानां व्रीडातङ्कादिर्भवेत्। परगतत्वेन त्वरस्यतापातः। विभवादयोऽपि प्रथमतः साधारण्येन प्रतीयन्त इत्याह–

**परस्य न परस्येति ममेति न ममेति च।। १२।।**

**तदास्वादे विभावादेः परिच्छेदो न विद्यते।**

ननु तथापि कथमलौकिकत्वमेतेषां विभावादीनामित्युच्यते–

**विभावनादिव्यापारमलौकिकमुपेयुषाम्।। १३।।**

**अलौकिकत्वमेतेषां भूषणं न तु दूषणाम्।**

आदिशब्दादनुभावनसंचारणे। तत्र विभावनं रत्यादेर्विशेषेणास्वादाङ्कुरण-योग्यतानयनम्। अनुभावनमेवम्भूतस्य रत्यादेः समनन्तरमेव रसादिरूपतया भावनम्। संचारणं तथाभूतरयैव तस्य सम्यक्चारणाम्।

विभावादीनां यथासंख्यं कारणकार्यसहकारित्वे कथं त्रयाणामेव रसोद्बोधे कारणत्वमित्युच्यते–

**कार्यकारणसञ्चारिरूपा अपि हि लोकतः।। १४।।**

**रसोद्बोधे विभावाद्याः कारणान्येव ते मताः।**

NOTES

ननु तर्हि कथं रसास्वादे तेषामेक: प्रतिभास इत्युच्यते–

**प्रतीयमान: प्रथमं प्रत्येकं हेतुरुच्यते।। १५।।**

**तत: संमिलित: सर्वो विभावादि: सचेतसाम्।**
**प्रपानकरसन्यायाञ्चर्व्यमाणो रसो भवेत्।। १६।।**

यथा खण्डमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वाद: प्रपानकरसे संजायते, विभावादिसम्मेलनादिहापि तथेत्यर्थ:।

ननु यदि विभावनुभावव्यभिचारिभिर्मिलितैरेव रसस्तत्कथं तेषामेकस्य द्वयोर्वा सद्भावेऽपि स स्यादित्युच्यते–

**सद्भावञ्चेद्विभावादेर्द्वयोरेकस्य वा भवेत्।**

**झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते।। १७।।**

अन्यसमाक्षेपश्च प्रकरणादिवशात्। यथा–

*'दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयो:*
*संक्षिप्तं निबिडोन्नतस्तनमुर: पार्श्वे प्रमृष्टे इव।*
*मध्य: पाणिमितो नितम्बि जघनं पादावुदग्राङ्गुली*
*छन्दो नर्तयितुर्यथैव मनस: सृष्टं तथास्या वपु:।।'*

अत्र मालविकामभिलषतोऽग्निमित्रस्य मालविकारूपविभावमात्रवर्णनेनाऽपि संचारिणामौत्सुक्यादीनामनुभावानां च नयनविस्फारादीनामौचित्यादेवाक्षेप:। एवमन्याक्षेपेऽप्यूह्यम्।

अनुकार्यगतो रस इति वदत: प्रत्याह–

**पारिमित्याल्लौकिकत्वात्सान्तरायतया तथा।**
**अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्।। १८।।**

सीतादिदर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादे: सान्तरायश्च, तस्मात्कथं रसरूपतामियात् ? रसस्यैतद्धर्मत्रितयविलक्षणाधर्मकत्वात्। अनुकर्तृगतत्वं चास्य निरस्यति–

**शिक्षाभ्यासादिमात्रेण राघवादे: सरूपताम्**
**दर्शयन्नर्तको नैव रसस्यास्वादको भवेत्।। १९।।**

**किं च।**

**काव्यार्थभावनेनायमपि सभ्यपदास्पदम्।**

NOTES

यदि पुनर्नटोऽपि काव्यार्थभावनया रामादिस्वरूपतामात्मनो दर्शयेत्तदा सोऽपि सभ्यमध्य एव गण्यते।

**नायं ज्ञाप्यः स्वसत्तायां प्रतीत्यव्यभिचारतः॥ २०॥**

यो हि ज्ञाप्यो घटादिः स सन्नपि कदाचिदज्ञातो भवति न ह्ययं तथा, प्रतीतिमन्तरेणाभावात्।

**यस्मादेष विभावादिसमूहालम्बनात्मकः। तस्मान्न कार्यः**

यदि रसः कार्यः स्यात्तदा विभावादिज्ञानकारणक एव स्यात्। ततश्च रसप्रतीतिकाले विभावादयो न प्रतीयेरन्। कारणज्ञानतत्कार्यज्ञानादीनां युगपददर्शनात्। नहि चन्दनस्पर्शज्ञानं तज्जन्यसुखज्ञानं चैकदा संभवति। रसस्य च विभावादि-समूहालम्बनात्मकतयैव प्रतीतेर्न विभावादिज्ञानकारणकत्वमित्यभिप्रायः।

**नो नित्यः पूर्वसंवेदनोज्झितः।**
**असंवेदनकाले हि न भावोऽप्यस्य विद्यते॥ २१॥**

न खलु नित्यवस्तुनोऽसंवेदनकालेऽसंभवः।

**नापि भविष्यन्साक्षादानन्दमयप्रकाशरूपत्वात्।**
**कार्यज्ञाप्यविलक्षणभावान्नो वर्तमानोऽपि॥ २२॥**

**विभावादिपरामर्शविषयत्वात्सचेतसाम्।**
**परानन्दमयत्वेन संवेद्यत्वादपि स्फुटम्॥ २३॥**

**न निर्विकल्पकं ज्ञानं तस्य ग्राहकमिष्यते।**
**तथाऽभिलापसंसर्गयोग्यत्वविरहान्न च॥ २४॥**

**सविकल्पकसंवेद्यः**

सविकल्पकज्ञानसंवेद्यानां हि वचनप्रयोगयोग्यता। न तु रसस्य तथा।

**साक्षात्कारतया न च।**
**परोक्षस्तत्प्रकाशो नापरोक्षः शब्दसंभवात्॥ २५॥**

तत्कथय कीदृगस्य तत्त्वमश्रुतादृप्टपूर्वनिरूपणप्रकारस्येत्याह—

**तस्मादलौकिकः सत्यं वेद्यः सहृदयैरयम्।**

तत्किं पुनः प्रमाणं तस्य सद्भाव इत्याह—

**प्रमाणं चर्वणैवात्र स्वाभिन्ने विदुषां मतम्॥ २६॥**

NOTES

चर्वणा आस्वादनम्। तच्च 'स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः' इत्युक्तप्रकारम्।

ननु यदि रसो न कार्यस्तत्कथं महर्षिणा 'विभावानुभावव्यभिचारि-संयोगाद्रसनिष्पत्तिः' इति लक्षणं कृतमित्युच्यते–

**निष्पत्त्या चर्वणस्यास्य निष्पत्तिरुपचारतः।**

यद्यपि रसाभिन्नतया चर्वणस्यापि न कार्यत्वं, तथापि तस्य कादाचित्कतया उपचरितेन कार्यत्वेन, कार्यत्वमुपचर्यते।

**अवाच्यत्वादिकं तस्य वक्ष्ये व्यञ्जनरूपणे॥ २७॥**

तस्य रसस्य। आदिशब्दादलक्ष्यत्वादि।

ननु यदि मिलिता रत्यादयो रसस्तत्कथमस्य स्वप्रकाशत्वं कथं वाऽखण्डत्वमित्याह–

**रत्यादिज्ञानतादात्म्यादेव यस्माद्रसो भवेत्।**
**ततोऽस्य स्वप्रकाशत्वमखण्डत्वं च सिध्यति॥**

यदि रत्यादिकं प्रकाशशरीरादतिरिक्तं स्यात्तदैवास्य स्वप्रकाशत्वं न सिध्येत्। न च तथा। तादात्म्याङ्गीकारात्। यदुक्तम्–'यद्यपि रसानन्यतया चर्वणापि न कार्या, तथापि कादाचित्कतया कार्यत्वमुपकल्प्य तदेकात्मन्यनादिवासनापरिणतिरूपे रत्यादिभावेऽपि व्यवहार इति भावः' इति। सुखादितादात्म्याङ्गीकारे चास्माकीं सिद्धान्तशय्यामधिशय्य दिव्यं वर्षसहस्रं प्रमोदनिद्रामुपेया इति च। 'अभिन्नोऽपि स प्रमात्रा वासनोपनीतरत्यादितादात्म्येन गोचरीकृतः' इति च। ज्ञानस्य स्वप्रकाशत्व-मनङ्गीकुर्वतामुपरि वेदान्तिभिरेव पातनीयो दण्डः। तादात्म्यादेवास्याखण्डत्वम्।

रत्यादयो हि प्रथममेकैकशः प्रतीयमानाः सर्वेऽप्येकीभूताः स्फुरन्त एव रसतामापद्यन्ते। तदुक्तम्–'विभावा अनुभावाश्च सात्त्विका व्यभिचारिणः। प्रतीयमानाः प्रथमं खण्डशो, यान्त्यखण्डताम्।।' इति।

'परमार्थतस्त्वखण्ड एवायं वेदान्तप्रसिद्धब्रह्मतत्त्ववद्वेदितव्यः' इति च।

अथ के ते विभावानुभावव्यभिचारिण इत्यपेक्षायां विभावमाह–

**रत्याद्युद्बोधका लोके विभावाः काव्यनाट्ययोः।**

NOTES

ये हि लोके रामादिगतरतिहासादीनामुद्बोधकारणानि सीतादयस्त एव काव्ये नाट्ये च निवेशिताः सन्तः 'विभाव्यन्ते आस्वादाङ्कुरप्रादुभावयोग्याः क्रियन्ते सामाजिकरत्यादिभावा एभिः' इति विभावा उच्यन्ते।

*तदुक्तं भर्तृहरिणा–*

'शब्दोपहितरूपांस्तान्बुद्धेर्विषयतां गतान्। प्रत्यक्षनिव कंसादीन्साधनत्वेन मन्यते।।'

*तद्भेदावाह–*

**आलम्बनोद्दीपनाख्यौ तस्य भेदावुभौ स्मृतौ।**

*स्पष्टम्। तत्र–*

**आलम्बनो नायकादिस्तमालम्ब्य रसोद्‌गमात्।। २९।।**

आदिशब्दान्नायिकाप्रतिनायकादयः। अत्र यस्य रसस्य यो विभावः स तत्स्वरूपवर्णने वक्ष्यते। तत्र नायकः–

**त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।**
**दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान्नेता।। ३०।।**

दक्षः क्षिप्रकारी। शीलं सद्‌वृत्तम्। एवमादिगुणसम्पन्नो नेता नायको भवति।

*तद्भेदानाह–*

**धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।**
**धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः।। ३१।।**

*स्पष्टम्। तत्र धीरोदात्तः–*

**अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।**
**स्थेयान्निगूढमानो धीरोदात्तो दृढव्रतः कथितः।। ३२।।**

अविकत्थनोऽनात्मश्लाघाकरः। महासत्त्वो हर्षशोकाद्यनभिभूतस्वभावः। निगूढमानो विनयच्छन्नगर्वः। दृढव्रतोऽङ्गीकृतनिर्वाहकः। यथा–रामयुधिष्ठिरादिः।

*अथ धीरोद्धतः–*

**मायापरः प्रचण्डश्चपलोऽहंकारदर्पभूयिष्ठः।**
**आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः।। ३३।।**

*यथा*–भीमसेनादि:। अथ धीरललित:–

**निश्चिन्तो मृदुरनिशं कलापरो धीरललित: स्यात्।**

कला नृत्यादिका। यथा–रत्नावल्यादौ वत्सराजादि:। अथ धीरप्रशान्त:–

**सामान्यगुणैर्भूयान्द्विजादिको धीरशान्त: स्यात्॥ ३४॥**

यथा मालतीमाधवादौ माधवादि:। एषां च शृङ्गारादिरूपत्वे भेदानाह–

**एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा।**

तत्र तेषां धीरोदात्तादीनां प्रत्येकं दक्षिणधृष्टानुकूलशठत्वेन षोडशप्रकारो नायक:।

**एषु त्वनेकमहिलासमरागो दक्षिण: कथित:॥ ३५॥**

*द्वयोस्त्रिचतु:प्रभृतिषु नायिकासु तुल्यानुरागो दक्षिणनायक:। यथा–*

*'स्नाता तिष्ठति कुन्तलेश्वरसुता, वारोऽङ्गराजस्वसु-*
*र्द्यूते रात्रिरियं जिता कमलया, देवी प्रसाद्याद्य च।*
*इत्यन्त:पुरसुन्दरी: प्रति मया विज्ञाय विज्ञापिते*
*देवेनाप्रतिपत्तिमूढमनसा द्वित्रा: स्थितं नाडिका:॥'*

**कृतागा अपि नि:शङ्कस्तर्जितोऽपि न लज्जित:।**
**दृष्टदोषोऽपि मिथ्यावाक्कथितो धृष्टनायक:॥ ३६॥**

***यथा मम–***

*'शोणं वीक्ष्य मुखं विचुम्बितुमहं यात: समीपं, तत:*
*पादेन प्रहृतं तया, सपदि तं धृत्वा सहासे मयि।*
*किंचित्तत्र विधातुमक्षमतया बाष्पं सृजन्त्या: सखे,*
*ध्यातश्चेतसि कौतुकं वितनुते कोपोऽपि वामभ्रुव:॥'*

**अनुकूल एकनिरत:**

एकस्यामेव नायिकायामासक्तोऽनुकूलनायक:। यथा–

*'अस्माकं सखि वाससी न रुचिरे, ग्रैवेयकं नोज्ज्वलं,*
*नो वक्रा गतिरुद्धतं न हसितं, नैवास्ति कश्चिन्मद:।*
*किं त्वन्येऽपि जना वदन्ति सुभगोऽप्यस्या: प्रियो नान्यतो*
*दृष्टिं निक्षिपतीति विश्वमियता मन्यामहे दु:स्थितम्॥'*

NOTES

NOTES

**शठोऽयमेकत्र बद्धभावो यः।**
**दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति॥ ३७॥**

यः पुनरेकस्यामेव नायिकायां बद्धभावो द्वयोरपि नायिकयोर्बहिर्दर्शितानुरागोऽन्यस्यां नायिकायां गूढं विप्रियमाचरति स शठः। यथा–

'शठान्यस्याः काञ्चीमणिरणितमाकर्ण्य सहसा यदाश्लिष्यन्नेव प्रशिथिलभुज-ग्रन्थिरभवः।

तदेतत्क्वाचक्षे, घृतमधुमयत्वाद् बहुवचोविषेणाघूर्णन्ती किमपि न सखी मे गणयति॥'

**एषां च त्रैविध्यादुत्तममध्याधमत्वेन।**
**उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च॥ ३८॥**

एषामुक्तषोडशभेदानाम्। अथ प्रसङ्गादेतेषां सहायानाह–

**दूरानुवर्तिनि स्यात्तस्य प्रासङ्गिकेतिवृत्ते तु।**
**किंचित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः॥ ३९॥**

तस्य नायकस्य बहुव्यापिनि प्रसङ्गसंगते इतिवृत्तेऽनन्तरोक्तैर्नायकसामान्यगुणैः किंचिदूनः पीठमर्दनामा सहायो भवति। यथा–रामचन्द्रादीनां सुग्रीवादयः। अथ शृङ्गारसहायाः–

**शृङ्गारेऽस्य सहाया विटचेटविदूषकाद्याः स्युः।**
**भक्ता नर्मसु निपुणाः कुपितवधूमानभञ्जनाः शुद्धाः॥ ४०॥**

आदिशब्दान्मालाकाररजकताम्बूलिकगान्धिकादयः। तत्र विटः–

**संभोगहीनसम्पद्विटस्तु धूर्तः कलैकदेशज्ञः।**
**वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम्॥ ४१॥**

चेटः प्रसिद्ध एव।

**कुसुमवसन्ताद्यभिधः कर्मवपुर्वेषभाषाद्यैः।**
**हास्यकरः कलहरतिर्विदूषकः स्यात्स्वकर्मज्ञः॥ ४२॥**

स्वकर्म भोजनादि। अर्थचिन्तने सहायमाह–

**मन्त्री स्यादर्थानां चिन्तायां**

अर्थास्तन्त्रावापादयः। यत्त्वत्र सहायकथनप्रस्तावे 'मन्त्री स्वं चोभयं चापि सखा तस्यार्थचिन्तने' इति केनचिल्लक्षणं कृतम्, तदपि राज्ञोऽर्थचिन्तनोपाय-

NOTES

लक्षणप्रकरणे लक्षयितव्यम्। न तु सहायकथनप्रकरणे। 'नायकस्यार्थचिन्तने मन्त्री सहाय:' इत्युक्तेऽपि नायकस्यार्थत एव सिद्धत्वात्। यदप्युक्तम् 'मन्त्रिणा ललित: शेषा मन्त्रिष्वायत्तसिद्धय:' इति, तदपि स्वलक्षणकथनेनैव लक्षितस्य धीरललितस्य मन्त्रिमात्रायत्तार्थचिन्तनोपपत्तेर्गतार्थम्। न चार्थचिन्तने तस्य मन्त्री सहाय:। किं तु स्वमेव संपादक:, तस्यार्थचिन्तनाद्यभावात्। अथान्त:पुरसहाया:–

**तद्वदवरोधे।**

**वामनषण्ढकिरातम्लेच्छाभीरा: शकारकुब्जाद्या:॥ ४३॥**

**मदमूर्खताभिमानी दुष्कुलतैश्वर्यसंयुक्त:।**
**सोऽयमनूढाभ्राता राज्ञ: श्याल: शकार इत्युक्त:॥ ४४॥**

आद्यशब्दान्मूकादय:। तत्र षण्ढवामनकिरातकुब्जादयो यथा रत्नावल्याम्–

*'नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-*
*मन्त:कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामन:।*
*पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्न: किरातै: कृतं*
*कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किन:॥'*

शकारो मृच्छकटिकादिषु प्रसिद्ध:। अन्येऽपि यथादर्शनं ज्ञातव्या:। अथ दण्डसहाया:–

**दण्डे सुहृत्कुमाराटविका: सामन्तसैनिकाद्याश्च।**

दुष्टनिग्रहो दण्ड:। स्पष्टम्।

**ऋत्विक्पुरोधस: स्युर्ब्रह्मविदस्तापसास्तथा धर्मे॥ ४५॥**

ब्रह्मविदो वेदविद:, आत्मविदो वा। अत्र च–

**उत्तमा: पीठमर्दाद्या:**

आद्यशब्दान्मन्त्रिपुरोहितादय:।

**मध्यौ विटविदूषकौ।**

**तथा शकारचेटाद्या अधमा: परिकीर्तिता:॥ ४६॥**

*आद्यशब्दात्ताम्बूलिकगान्धिकादय:। अथ प्रसङ्गाद् दूतानां विभागगर्भलक्षणमाह–*

**निसृष्टार्थो मितार्थश्च तथा संदेशहारक:।**
**कार्यप्रेष्यस्त्रिधा दूतो दूत्यश्चापि तथाविधा:॥ ४७॥**

NOTES

तत्र कार्यप्रेष्तो दूत इति लक्षणाम्। तत्र–

**उभयोर्भावमुन्नी स्वयं वदति चोत्तरम्।**
**सुश्लिष्टं कुरुते कार्यं निसृष्टार्थस्तु स स्मृतः।। ४८।।**

उभयोरिति येन प्रेषितो यदन्तिके प्रेषितश्च।

**मितार्थभाषी कार्यस्य सिद्धकारी मितार्थकः।**
**यावद्भाषितसंदेशहारः संदेशहारकः।।४९।।**

अथ सात्त्विकनायकगुणाः–

**शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यतेजसी।**
**ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः।। ५०।।**

तत्र–

**शूरता दक्षता सत्यं महोत्साहोऽनुरागिता।**
**नीचे घृणाधिके स्पर्धा यतः शोभेति तां विदुः।। ५१।।**

तत्रानुरागिता यथा–

**'अहमेव मतो महीपतेरिति सर्वः प्रकृतिष्वचिन्तयत्।**
**उदधेरिव निम्नगाशतेष्वभवन्नास्य विमानना क्वचित्।।'**

एवमन्यदपि। अथ विलासः–

**धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः।**

यथा–

*'दृष्टिस्तृणीकृतजगत्त्रयसत्त्वसारा धीरोद्धता नमयतीव गतिर्धरित्रीम्।*
*कौमारकेऽपि गिरिवद् गुरुतां दधानो वीरो रसः किमयमेत्युत दर्प एषः।।'*

**संक्षोभेष्वप्यनुद्वेगो माधुयं परिकीर्तितम्।। ५२।।**

ऊह्यमुदाहरणम्।

**भीशोकक्रोधहर्षाद्यैर्गाम्भीर्यं निर्विकारता।**

यथा–

'आहूतस्याभिषेकाय विसृष्टस्य वनाय च। न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः।।

NOTES

**व्यवसायादचलनं धैर्यं विघ्ने महत्यपि॥ ५३॥**

यथा–

*'श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्हरः प्रसंख्यानपरो बभूव।*
*आत्मेश्वराणां नहि जातु विघ्नाः समाधिभेदप्रभवो भवन्ति॥'*

**अधिक्षेपापमानादेः प्रयुक्तस्य परेण यत्।**
**प्राणात्ययेऽप्यसहनं तत्तेजः समुदाहृतम्॥ ५४॥**

**वाग्वेषयोर्मधुरता तद्वच्छृङ्गारचेष्टितं ललितम्।**
**दानं सप्रियभाषणमौदार्यं शत्रुमित्रयोः समता॥ ५५॥**

एषामुदाहरणान्यूह्यानि।

**अथ नायिका त्रिभेदा स्वाऽन्या साधारणी स्त्रीति।**
**नायकसामान्यगुणैर्भवति यथासंभवैर्युक्ता॥ ५६॥**

नायिका पुनर्नायकसामान्यगुणैस्त्यागादिभिर्यथासंभवैर्युक्ता भवति। सा च स्वस्त्री अन्यस्त्री स्राधारणास्त्रीति त्रिविधा। तत्र स्वस्त्री–

**विनयार्जवादियुक्ता गृहकर्मपरा पतिव्रता स्वीया।**

यथा–

'लज्जापज्जत्तपसाहणाइँ परभत्तिणिप्पिवासाइं। अविणअदुम्मेधाइँ धण्णाणं घरे कलत्ताइं॥'

**सापि कथिता त्रिभेदा मुग्धा मध्या प्रगल्भेति॥ ५७॥**

तत्र–

**प्रथमावतीर्णयौवनमदनविकारा रतौ वामा।**
**कथिता मृदुश्च माने समधिकलज्जावती मुग्धा॥ ५८॥**

*तत्र प्रथमावतीर्णयौवना यथा मम तातपादानाम्–*

*'मध्यस्य प्रथिमानमेति जघनं, वक्षोजयोर्मन्दता*
*दूरं यात्युदरं च, रोमलतिका नेत्रार्जवं धावति।*
*कन्दर्पं परिवीक्ष्य नूतनमनोराज्याभिषिक्तं क्षणा-*
*दङ्गानीव परस्परं विदधते निर्लुण्ठनं सुभ्रुवः॥'*

NOTES

प्रथमावतीर्णमदनविकारा यथा मम प्रभावतीपरिणये–

*'दत्ते सालसमन्थरं भुवि पदं, निर्याति नान्तःपुरान्,*
*नोद्दामं हसति, क्षणात्कलयते ह्रीयन्त्रणां कामपि।*
*किंचिद्भावगभीरवक्रिमलवस्पृष्टं मनाग्भाषते,*
*सभ्रूभङ्गमुदीक्षते प्रियकथामुल्लापयन्तीं सखीम्।।'*

रतौ वामा यथा–

*'दृष्टा दृष्टिमधो ददाति, कुरुते नालापमाभाषिता,*
*शय्यायां परिवृत्य तिष्ठति, बलादालिङ्गिता वेपते।*
*निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते,*
*जाता वामतयैव संप्रति मम प्रीत्यै नवोढा प्रिया।।'*

माने मृदुर्यथा–

*'सा पत्युः प्रथमापराधसमये सख्योपदेशं विना*
*नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम्।*
*स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला*
*बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः।।'*

समधिकिलज्जावती यथा– 'दत्ते सालसमन्थरं--' इत्यत्र श्लोके।

अत्र समधिकलज्जावतीत्वेनापि लब्धाया रतिवामताया विच्छित्तिविशेषवत्तया पुनः कथनम्।

अथ मव्या–

**मध्या विचित्रसुरता प्ररूढस्मरयौवना।**
**ईषत्प्रगल्भवचना मध्यमव्रीडिता मता।। ५६।।**

विचित्रसुरता यथा–

*'कान्ते तथा कथमपि प्रथितं मृगाक्ष्या चातुर्यमुद्धतमनोभवया रतेषु।*
*तत्कूजितान्यनुवदद्भिरनेकवारं शिष्यायितं गृहकपोतशतैर्यथास्याः।।'*

प्ररूढस्मरा यथात्रैवोदाहरणे। प्ररूढयौवना यथा मम–

*नेत्रे खञ्जनगञ्जने सरसिजप्रत्यर्थि पाणिद्वयं*
*वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः।*

NOTES

*कान्तिः काञ्चनचम्पकप्रतिनिधिर्वाणी सुधास्यन्दिनी*
*स्मेरेन्दीवरदामसोदरवपुस्तस्याः कटाक्षच्छटा।।*

एवमन्यत्रापि। अथ प्रगल्भा—

**स्मरान्धा गाढतारुण्या समस्तरतकोविदा।**
**भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका।। ६०।।**

स्मरान्धा यथा—

‘ *‘धन्यासि या कथयसि प्रियसंगमेऽपि विश्रब्धचाटुकशतानि रतान्तरेषु।*
*नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किञ्चिदपि स्मरामि।।’*

गाढतारुण्या यथा—

*‘अत्युन्नतस्तनमुरो नयने सुदीर्घे वक्रे भ्रुवावतितरां वचनं ततोऽपि।*
*मध्योऽधिकं तनुरनूनगुरुर्नितम्बो मन्दा गतिः किमपि चाद्भुतयौवनायाः।।’’*

समस्तरतकोविदा यथा—

*‘क्वचित्ताम्बूलाक्तः क्वचिदगरुपङ्काङ्कमलिनः*
*क्वचिच्चूर्णोद्गारी क्वचिदपि च सालक्तकपदः।*
*वलीभङ्गाभोगैरलकपतितैः शीर्णकुसुमैः*
*स्त्रियाः सर्वावस्थं कथयति रतं प्रच्छदपटः।।’*

भावोन्नता यथा—

*‘मधुरवचनैः सभ्रूभङ्गैः कृताङ्गुलितर्जनै रभसरचितैरङ्गन्यासैर्महोत्सवबन्धुभिः।*

असकृदसकृत्स्फारस्फारैरपाङ्गविलोकितैस्त्रिभुवनजये सा पञ्चेषोः करोति सहायताम्।।’ स्वल्पव्रीडा यथा—

*‘धन्यासि या कथयसि—’* इत्यत्रैव।

आक्रान्तनायका यथा—

*‘स्वामिन्भङ्गुरयालकं सतिलकं भालं विलासिन्कुरु,*
*प्राणेश, त्रुटितं पयोधतले हारं पुनर्योजय।*
*इत्युक्त्वा सुरतावसानसमये संपूर्णचन्द्रानना*
*स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम्।।’*

NOTES

मध्याप्रगल्भयोर्भेदान्तराण्याह–

**ते धीरा चाप्यधीरा च धीराधीरेति षड्विधे।**

ते मध्याप्रगल्भे। तत्र–

**प्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दहेद्रुषा॥ ६१॥**

**धीराधीरा तु रुदितैरधीरा परुषोक्तिभिः।**

तत्र मध्या धीरा यथा–

*'तदवितथमवादीर्यन्मम त्वं प्रियेति प्रियजनपरिभुक्तं यद्दुकूलं दधानः।*
*मदधिवसतिमागाः, कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन।।'*

मध्यैव धीराधीरा यथा–

*'बाले, नाथ, विमुञ्च मानिनि रुषं, रोषान्मया किं कृतं,*
*खेदोऽस्मासु, न मेऽपराध्यति भवान्, सर्वेऽपराधा मयि।*
*तत्किं रोदिषि गद्गदेन वचसा, कस्याग्रतो रुद्यते,*
*नन्वेतन्मम, का तवास्मि, दयिता, नास्मीत्यतो रुद्यते।।'*

इयमेवाधीरा यथा–

*'सार्धं मनोरथशतैस्तव धूर्त, कान्ता सैव स्थिता मनसि कृत्रिमहावरम्या।*
*अस्माकमस्ति नहि कश्चिदिहावकाशस्तस्मात्कृतं चरणपातविडम्बनाभिः।।'*

**प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा॥ ६२॥**

**उदास्ते सुरते तत्र दर्शयन्त्यादरान्बहिः।**

तत्र प्रिये। यथा–

*'एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद् दूरत-*
*स्ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः।*
*आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्याऽन्तिके*
*कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः।।'*

**धीराधीरा तु सोल्लुण्ठभाषितैः खेदयत्यमुम्॥ ६३॥**

अमुं नायकम्। यथा मम–

*'अनलंकृतोऽपि सुन्दर हरसि मनो मे यतः प्रसभम्।*
*किं पुनरलंकृतस्त्वं सम्प्रति नखरक्षतैस्तस्याः।।'*

**तर्जयेत्ताडयेदन्या**

अन्या अधीरा। यथा–'शोणं वीक्ष्य मुखं–' इत्यत्र। अत्र च सर्वत्र 'रुषा' इत्यनुवर्तते।

**प्रत्येकं ता अपि द्विधा।**
**कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति॥ ६४॥**

ता अनन्तरोक्ताः षड्भेदा नायिकाः। यथा–

*'दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरा-*
*देकस्या नयने पिधाय विहितक्रीडानुवल्वच्छलः।*
*ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-*
*मन्तर्हासलसत्कपोलफलकां धूर्तोऽपरां चुम्बति॥'*

**मध्याप्रगल्भयोर्भेदास्तद्वद् द्वादश कीर्तिताः।**
**मुग्धा त्वेकैव तेन स्युः स्वीया भेदास्त्रयोदश॥ ६५॥**

**परकीया द्विधा प्रोक्ता परोढा कन्यका तथा।**

तत्र–

**यात्रादिनिरताऽन्योढा कुलटा गलितत्रपा॥ ६६॥**

यथा–

*'स्वामी निःश्वसितेऽप्यसूयति, मनोजिघ्रः सपत्नीजनः,*
*श्वश्रूरिङ्गितदैवतं, नयनयोरीहालिहो यातरः।*
*तद् दूरादयमञ्जलिः, किमधुना दृग्भङ्गिभावेन ते,*
*वैदग्धीमधुरप्रबन्धरसिक, व्यर्थोऽयमत्र श्रमः॥'*

अत्र हि मम परिणेतान्नाच्छादनादिदातृतया स्वाम्येव, न तु वल्लभः। त्वं तु वैदग्धीमधुरप्रबन्धरसिकतया मम वल्लभोऽसीत्यादिव्यङ्ग्यार्थवशादस्याः परनायक-विषया रतिः प्रतीयते।

**कन्या त्वजातोपयमा सलज्जा नवयौवना।**

अस्याश्च पित्राद्यायत्तत्वात्परकीयात्वम्। यथा मालतीमाधवादौ मालत्यादिः।

**धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका॥ ६७॥**

NOTES

**निर्गुणानपि न द्वेष्टि न रज्यति गुणिष्वपि।**
**वित्तमात्रं समालोक्य सा रागं दर्शयेद् बहिः॥ ६८॥**

**काममङ्गीकृतमपि परिक्षीणधनं नरम्।**
**मात्रा निष्कासयेदेषा पुनः संधानकाङ्क्षया॥ ६९॥**

**तस्कराः पण्डका मूर्खाः सुखप्राप्तधनास्तथा।**
**लिङ्गिनश्छन्नकामाद्या आसां प्रायेण वल्लभाः॥ ७०॥**

**एषापि मदनायत्ता क्वापि सत्यानुरागिणी।**
**रक्तायां वा विरक्तायां रतमस्यां गुदुर्लभम्॥ ७१॥**

पण्डको वातण्डकादिः। छन्नं प्रच्छन्नं ये कामयन्ते ते छन्नकामाः। तत्र रागहीना यथा लटकमेलकादौ मदनमञ्जर्यादिः। रक्ता यथा मृच्छकटिकादौ वसन्तसेनादिः। पुनश्च–

**अवस्थाभिर्भवन्त्यष्टावेताः षोडश भेदिताः।**
**स्वाधीनभर्तृका तद्वत्खण्डिताथाभिसारिका॥ ७२॥**

**कलहान्तरिता विप्रलब्धा प्रोषितभर्तृका।**
**अन्या वासकसज्जा स्याद्विहोत्कण्ठिता तथा॥ ७३॥**

तत्र–

**कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम्।**
**विचित्रविभ्रमासक्ता सा स्यात्स्वाघीनभर्तृका॥ ७४॥**

यथा–'अस्माकं सखि वाससी–' इत्यादि।

**पार्श्वमेति प्रियो यस्या अन्यसंभोगचिह्नितः।**
**सा खण्डितेति कथिता घीरैरीर्ष्याकषायिता॥ ७५॥**

यथा–'तदवितथमवादीः–' इत्यादि।

**अभिसारयते कान्तं सा मन्मथवशंवदा।**
**स्वयं वाभिसरत्येषा धीरैरुक्ताभिसारिका॥ ७६॥**

क्रमाद्यथा–

*'न च मेऽवगच्छति यथा लघुतां करुणां यथा च कुरुते स मयि।*
*निपुणं तथैनमभिगम्य वदेरभिदूति काचिदिति संदिदिशे॥'*

*'उत्क्षिप्तं करकङ्कणद्वयमिदं बद्धा दृढं मेखला*
*यत्नेन प्रतिपादिता मुखरयोर्मञ्जीरयोर्मूकता।*
*आरब्धे रभसान्मया प्रियसखि क्रीडाभिसारोत्सवे*
*चण्डालस्तिमिरावगुण्ठनपटक्षेपं बिधत्ते विधुः।।'*

**संलीना स्वेषु गात्रेषु मूकीकृतविभूषणा।**
**अवगुण्ठनसंवीता कुलजाभिसरेद्यदि।। ७७।।**

**विचित्रोज्ज्वलवेषा तु रणन्नूपुरकङ्कणा।**
**प्रमोदस्मेरवदना स्याद्वेश्याभिसरेद्यदि।। ७८।।**

**मदस्खलितसंलापा विभ्रमोत्फुल्ललोचना।**
**आविद्धगतिसंचारा स्यात्प्रेष्याभिसरेद्यदि।। ७९।।**

तत्राद्ये 'उत्क्षिप्तं–' इत्यादि अन्त्ययारूह्यमुदाहरणम्। प्रसङ्गादभिसारस्थानानि कथ्यन्ते–

**क्षेत्रं वाटी भग्नदेवालयो दूतीगृहं वनम्।**
**मालापञ्चः श्मशानं च नद्यादीनां तटी तथा।। ८०।।**

**एवं कृताभिसाराणां पुंश्चलीनां विनोदने।**
**स्थानान्यष्टौ तथा ध्वान्तच्छन्ने कुत्रचिदाश्रये।। ८१।।**

**चाटुकारमपि प्राणनाथं रोषादपास्य या।**
**पश्चात्तापमवाप्नोति कलहान्तरिता तु सा।। ८२।।**

यथा मम तातपादानाम्–

*'नो चाटुश्रवणं कृतं न च दृशा हारोऽन्तिके वीक्षितः*
*कान्तस्य प्रियहेतवो निजसखीवाचोऽपि दूरीकृताः।*
*पादान्ते विनिपत्य तत्क्षणमसौ गच्छन्मया मूढया*
*पाणिभ्यामवरुध्य हन्त सहसा कण्ठे कथं नार्पितः।।'*

**प्रियः कृत्वापि संकेतं यस्या नायाति संनिधिम्।**
**विप्रलब्धा तु सा ज्ञेया नितान्तमवमानिता।। ८३।।**

यथा–

*'उत्तिष्ठ दूति यामो यामो यातस्तथापि नायातः।*
*यातः परमपि जीवेज्जीवितनाथो भवेत्तस्याः।।'*

NOTES

NOTES

**नानाकार्यवशाद्यस्या दूरदेशं गतः पतिः।**
**सा मनोभवदुःखार्ता भवेत्प्रोषितभर्तृका॥ ८४॥**

यथा–

*'तां जानीथाः परिमितकथां जीवितं मे द्वितीयं दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।*

*गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां जाता मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्॥'*

**कुरुते मण्डनं यस्याः सज्जिते वासवेश्मनि।**
**सा तु वासकसज्जा स्याद्विदितप्रियसंगमा॥ ८५॥**

यथा राघवानन्दानां नाटके–

*'विदूरे केयूरे कुरु, करयुगे रत्नवलयैरलं, गुर्वी ग्रीवाभरणलतिकेयं, किमनया? नवामेकामेकावलिमयि, मयि त्वं विरचयेर्न नेपथ्यं पथ्यं बहुतरमनङ्गोत्सवविधौ॥'*

**आगन्तुं कृतचित्तोऽपि दैवान्नायाति चेत्प्रियः।**
**तदनागमदुःखार्ता विरहोत्कण्ठिता तु सा॥ ८६॥**

यथा–

*'किं रुद्धः प्रियया कयाचिदथवा सख्या ममोद्वेजितः*
*किंवा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः।*
*इत्यालोच्य मृगीदृशा करतले विन्यस्य वक्त्राम्बुजं*
*दीर्घं निःश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः॥'*

**इति साष्टाविंशतिशतमुत्तममध्याधमस्वरूपेणा।**
**चतुरधिकाशीतियुतं शतत्रयं नायिकाभेदाः॥ ८७॥**

'इह च परस्त्रियौ कन्यकान्योढे संकेतात्पूर्वं विरहोत्कण्ठिते। पश्चाद्विदूषकादिना सहाभिसरन्त्यावभिसारिके। कुतोऽपि संकेतस्थानमप्राप्ते नायके विप्रलब्धे इति अवस्था एवानयोः। अस्वाधीनप्रिययोरवस्थान्तरायोगात्' इति कश्चित्।

**क्वचिदन्योन्यसांकर्यमासां लक्ष्येषु दृश्यते।**

यथा–

*"न खलु वयममुष्य दानयोग्याः पिबति च पाति च याऽसकौ रहस्त्वाम्।*
*विट विटपममुं ददस्व तस्यै भवति यतः सदृशोश्चिराय योगः॥*

*तव कितव किमाहितैर्वृथा नः क्षितिरुहपल्लवपुष्पकर्णपूरैः।*
*ननु जनविदितैर्भवद्व्यलीकैश्चिरपरिपूरितमेव कर्णयुग्मम्।।*

*मुहुरुपहसितामिवालिनादैर्वितरसि नः कलिकां किमर्थमेनाम्।*
*वसतिमुपगतेन धाम्नि तस्याः शठ कलिरेष महांस्त्वयाद्य दत्तः।।*

*इति गदितवती रुषा जघान स्फुरितमनोरमपक्ष्मकेसरेण।*
*श्रवणनियमितेन कान्तमन्या सममसिताम्बुरुहेण चक्षुषा च।।"*

इयं हि वक्रोक्त्या परुषवचनेन कर्णोत्पलताडनेन च धीरमध्यताऽधीरमध्यताऽधीरप्रगल्भताभिः संकीर्णा। एवमन्यत्राप्यूह्यम्।

**इतरा अप्यसंख्यास्ता नोक्ता विस्तरशङ्कया।। ८८।।**

ता नायिकाः। अथासामलंकाराः–

**यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यकाः।**
**अलंकारास्तत्र भावहावहेलास्त्रयोऽङ्गजाः।। ८९।।**

**शोभा कान्तिश्च दीप्तिश्च माधुर्यं च प्रगल्भता।**
**औदार्यं धैर्यमित्येते सप्तैव स्युरयत्नजाः।। ९०।।**

**लीला विलासो विच्छित्तिर्बिब्बोकः किलकिञ्चितम्।**
**मोट्टायितं कुट्टमितं विभ्रमो ललितं मदः।। ९१।।**

**विहृतं तपनं मौग्ध्यं विक्षेपश्च कुतूहलम्।**
**हसितं चकितं केलिरित्यष्टादशसंख्यकाः।। ९२।।**

**स्वभावजाश्च भावाद्या दश पुंसां भवन्त्यपि।**

पूर्वे भावादयो धैर्यान्ता दश नायकानामपि संभवन्ति। किंतु सर्वेऽप्यमी नायिकाश्रिता एव विच्छित्तिविशेषं पुष्णन्ति। तत्र भावः–

**निर्विकारात्मके चित्ते भावः प्रथमविक्रिया।।९३।।**

जन्मतः प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भावः। यथा–

'स एव सुरभिः कालः, स एव मलयानिलः। सैवेयमबला किंतु मनोऽन्यदिव दृश्यते।।'

अथ हावः–

**भ्रूनेत्रादिविकारैस्तु संभोगेच्छाप्रकाशकः।**
**हाव एवाल्पसंलक्ष्यविकारो हाव उच्यते।। ९४।।**

NOTES

NOTES

यथा–

*‘विवृण्वती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः।*
*साचीकृता चारुतरेण तस्थौ मुखेन पर्यस्तविलोचनेन।।’*

अथ हेला–

**हेलात्यन्तसमालक्ष्यविकारः त्यात्स एव तु।**

स एव भाव एव। यथा–

*‘तह से झत्ति पउत्ता बहुए सव्वङ्गविब्भमा सअला।*
*संसइअमुद्धभावा होइ चिरं जह सहीणं पि।।’*

अथ शोभा–

**रूपयौवनलालित्यभोगाद्यैरङ्गभूषणम्।। ९५।।**

**शोभा प्रोक्ता**

तत्र यौवनशोभा यथा–

*‘असंभृतं मण्डनमङ्गयष्टेरनासवाख्यं करणं मदस्य।*
*कामस्य पुष्पव्यतिरिक्तमस्त्रं बाल्यात्परं साथ वयः प्रपेदे।।’*

एवमन्यत्रापि। अथ कान्तिः–

**सैव कान्तिर्मन्मथाप्यायितद्युतिः।**

मन्मथोन्मेषेणातिविस्तीर्णा शोभैव कान्तिरुच्यते। यथा–‘नेत्रे खञ्जनगञ्जने–’ इत्यादि।

अथ दीप्तिः–

**कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते।। ९६।।**

यथा मम चन्द्रकलानामनाटिकायां चन्द्रकलावर्णानम्–

*‘तारुण्यस्य विलासः समधिकलावण्यसंपदो हासः।*
*धरणितलस्याभरणं युवजनमनसो वशीकरणम्।।’*

अथ माधुर्यम्–

**सर्वावस्थाविशेषेषु माधुर्यं रमणीयता।**

NOTES

यथा–

*'सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।*
*इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।'*

अथ प्रगल्भता–

**निःसाध्वसत्वं प्रागल्भ्यम्**

यथा–

'समाश्लिष्टाः समाश्लेषैश्चुम्बिताश्चुम्बनैरपि।
दष्टाश्च दंशनैः कान्तं दासीकुर्वन्ति योषितः।।'

अथौदार्यम्–

**औदार्यं विनयः सदा।। ९७।।**

यथा–

*न ब्रूते परुषां गिरं, वितनुते न भ्रूयुगं भङ्गुरं,*
*नोत्तंसं क्षिपति क्षितौ श्रवणतः सा मे स्फुटेऽप्यागसि।*
*कान्ता गर्भगृहे गवाक्षविवरव्यापारिताक्ष्या बहिः*
*सख्या वक्त्रमभि प्रयच्छति परं पर्यश्रुणी लोचने।।*

अथ धैर्यम्–

**उक्तात्मश्लाघना धैर्य मनोवृत्तिरचश्चला।**

यथा–

*'ज्वलतु गगने रात्रौ रात्रावखण्डकल शशी*
*दहतु मदनः किंवा मृत्योः परेण विधास्यति।*
*मम तु दयितः श्लाघ्यस्तातो जनन्यमलान्वया*
*कुलममलिनं न त्वेवायं जनो न च जीवितम्।।'*

अथ लीला–

**अङ्गैर्वेषैरलंकारैः प्रेमभिर्वचनैरपि।। ९८।।**
**प्रीतिप्रयोजितैर्लीलां प्रियस्यानुकृतिं विदुः।**

NOTES

यथा–

*'मृणालव्यालवलया वेणीबन्धकपर्दिनी।*
*परानुकारिणी पातु लीलया पार्वती जगत्।।'*

अथ विलासः–

**यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्।। ९९।।**

**विशेषस्तु विलासः स्यादिष्टसंदर्शनादिना।**

यथा–

*'अत्रान्तरे किमपि वाग्विभवातिवृत्तवैचित्र्यमुल्लसितविभ्रममायताक्ष्याः*
*तद्भूरिसात्त्विकविकारमपास्तधैर्यमाचार्यकं विजयि मान्मथमाविरासीत्।।'*

अथ विच्छित्तिः–

**स्तोकाप्याकल्परचना विच्छित्तिः कान्तिपोषकृत्।**

यथा–

*'स्वच्छाम्भःस्नपनविधौतमङ्गमोष्ठस्ताम्बूलद्युतिविशदो विलासिनीनाम्।*
*वासस्तु प्रतनु विविक्तमस्त्वितीयानाकल्पो यदि कुसुमेषुणा न शून्यः।।'*

अथ बिव्वोकः–

**बिब्बोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादरः।। १००।।**

यथा–

*'यासां सत्यपि सद्गुणानुसरणे दोषनुवृत्तिः परा*
*याः प्राणान्वरमर्पयन्ति न पुनः संपूर्णदृष्टिं प्रिये।*
*अत्यन्ताभिमतेऽपि वस्तुनि विधिर्यासां निषेधात्मक-*
*स्तास्त्रैलोक्यविलक्षणप्रकृतयो वामाः प्रसीदन्तु ते।।'*

अथ किलकिञ्चितम्–

**स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम्।**
**सांकर्यं किलकिञ्चितमभीष्टतमसंगमादिजाद्धर्षात्।। १०१।।**

यथा–

*'पाणिरोधमविरोधितवाञ्छं भर्त्सनाश्च मधुरस्मितगर्भाः।*
*कामिनः स्म कुरुते करभोरूर्हारि शुष्करुदितं च सुखेऽपि।।'*

NOTES

अथ मोट्टायितम्--

**तद्भावभाविते चित्ते वल्लभस्य कथादिषु।**
**मोट्टायितमिति प्राहुः कर्णकण्डूयनादिकम्॥ १०२॥**

यथा–

*'सुभग, त्वत्कथारम्भे कर्णकण्डूतिलालसा।*
*उज्जृम्भवदनाम्भोजा भिनत्त्यङ्गानि साऽङ्गना॥'*

अथ कुट्टमितम्–

**केशस्तनाधरादीनां ग्रहे हर्षेऽपि संभ्रमात्।**
**आहुः कुट्टमितं नाम शिरःकरविधूननम्॥ १०३॥**

*'पल्लवोपमितिसाम्यसपक्षं दष्टवत्यधरबिम्बमभीष्टे।*
*पर्यकूजि सरुजेव तरुण्यास्तारलोलवलयेन करेण॥'*

अथ विभ्रमः–

**त्वरया हर्षरागादेर्दयितागमनादिषु।**
**अस्थाने विभ्रमादीनां विन्यासो विभ्रमो मतः॥ १०४॥**

यथा–

*श्रुत्वाऽऽयान्तं बहिः कान्तमसमाप्तविभूषया।*
*भालेऽञ्जनं दृशोर्लाक्षा कपोले तिलकः कृतः॥*

अथ ललितम्–

**सुकुमारतयाङ्गानां विन्यासो ललितं भवेत्।**

यथा–

*'गुरुतरकलनूपुरानुनादं सललितनर्तितवामपादपद्मा।*
*इतरदनतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम॥'*

अथ मदः–

**मदो विकारः सौभाग्ययौवनाद्यवलेपजः॥ १०५॥**

यथा–

*'मा गर्वमुद्वह कपोलतले चकास्ति कान्तस्वहस्तलिखिता मम मञ्जरीति।*
*अन्यापि किं न खलु भाजनमीदृशीनां वैरी न चेद्भवति वेपथुरन्तरायः॥'*

NOTES

अथ विहृतम्–

*वक्तव्यकालेऽप्यवचो व्रीडया विहृतं मतम्।*

यथा–

*दूरागतेन कुशलं पृष्टा नोवाच सा मया किंचित्।*
*पर्यश्रुणी तु नयने तस्याः कथयांबभूवतुः सर्वम्।।*

अथ तपनम्–

**तपनं प्रियविच्छेदे स्मरावेगोत्थचेष्टितम्॥ १०६॥**

यथा मम–

*'श्वासान्मुञ्चति, भूतले विलुठति, त्वन्मार्गमालोकते,*
*दीर्घं रोदिति, विक्षिपत्यत इतः क्षामां भुजावल्लरीम्।*
*किच, प्राणसमान, काङ्क्षितवती स्वप्नेऽपि ते संगमं*
*निद्रां वाञ्छति, न प्रयच्छति पुनर्दग्धो विधिस्तामपि।।'*

अथ मौग्ध्यम्–

**अज्ञानादिव या पृच्छा प्रतीतस्यापि वस्तुनः।**
**वल्लभस्य पुरः प्रोक्तं मौग्ध्यं तत्त्ववेदिभिः॥ १०७॥**

यथा–

'के द्रुमास्ते क्व वा ग्रामे सन्ति केन प्ररोपिताः। नाथ, मत्कङ्कणन्यस्तं येषां मुक्ताफलं फलम्।।'

अथ विक्षेपः–

**भूषाणामर्धरचना मिथ्या विष्वगवेक्षणम्।**
**रहस्याख्यानमीषञ्च विक्षेपो दयितान्तिके॥ १०८॥**

यथा–

*'धम्मिल्लमर्धयुक्तं कलयति तिलकं तथाऽसकलम्।*
*किंचिद्वदति रहस्यं चकितं विष्वग्विलोकते तन्वी।।'*

अथ कुतूहलम्–

*रम्यवस्तुसमालोके लोलता स्यात्कुतूहलम्।*

NOTES

यथा–

*'प्रसाधिकालम्बितमग्रपादमाक्षिप्य काचिद् द्रवरागमेव।*
*उत्सृष्टलीलागतिरागवाक्षादलक्तकाङ्कां पदवीं ततान।।'*

अथ हसितम्–

**हसितं तु वृथा हासो यौवनोद्भेदसंभवः।। १०९।।**

यथा–

'अकस्मादेव तन्वङ्गी जहास यदियं पुनः। नूनं प्रसूनबाणोऽस्यां स्वाराज्यमधितिष्ठति।'

अथ चकितम्--

*कुतोऽपि दयितस्याग्रे चकितं भयसंभ्रमः।*

यथा–

*'त्रस्यन्ती चलशफरीविघट्टितोरूर्वामोरूरतिशयमाप विभ्रमस्य।*
*क्षुभ्यन्ति प्रसभमहो विनापि हेतोर्लीलाभिः किमु सति कारणो तरुण्यः।।'*

अथ केलिः–

**विहारे सह कान्तेन क्रीडितं केलिरुच्यते।। ११०।।**

यथा–

'व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः।
पयोधरेणोरसि काचिदुन्मनाः प्रियं जघानोन्नतपीवरस्तनी।।'

अथ मुग्धाकन्ययोरनुरागेङ्गितानि–

**दृष्टा दर्शयति व्रीडां सम्मुखं नैव पश्यति।**
**प्रच्छन्नं वा भ्रमन्तं वाऽतिक्रान्तं पश्यति प्रियम्।। १११।।**

**बहुधा पृच्छ्यमानापि मन्दमन्दमधोमुखी।**
**सगद्गदस्वरं किञ्चित्प्रियं प्रायेण भाषते।। ११२।।**

**अन्यैः प्रवर्तितां शश्वत्सावधाना च तत्कथाम्।**
**शृणोत्यन्यत्र दत्ताक्षी प्रिये बालानुरागिणी।। ११३।।**

NOTES

अथ सकलानामपि नायिकानामनुरागेङ्गितानि–

चिराय सविधे स्थानं प्रियस्य बहु मन्यते।
विलोचनपथं चास्य न गच्छत्यनलंकृता॥ ११४॥

कापि कुन्तलसंव्यानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत्स्फुटम्॥ ११५॥

आह्लादयति वागाद्यैः प्रियस्य परिचारकान्।
विश्वसित्यस्य मित्रेषु बहु मानं करोति च॥ ११६॥

सखीमध्ये गुणान्ब्रूते स्वधनं प्रददाति च।
सुप्ते स्वपिति दुःखेऽस्य दुःखं धत्ते सुखे सुखम्॥ ११७॥

स्थिता दृष्टिपथे शश्वत्प्रिये पश्यति दूरतः।
आभाषते परिजनं सम्मुखं स्मरविक्रियम्॥ ११८॥

यत्किंचिदपि संवीक्ष्य कुरुते हसितं मुधा।
कर्णकण्डूयनं तद्वत्कबीमोक्षसंयमौ॥ ११९॥

जृम्भते स्फोटयत्यङ्गं बालमाश्लिष्य चुम्बति।
भाले तथा वयस्याया रचयेत्तिलकक्रियाम्॥ १२०॥

अङ्गुष्ठाग्रेण लिखति सकटाक्षं निरीक्षते।
दशति स्वाघरं चापि ब्रूते प्रियमधोमुखी॥ १२१॥

न मुञ्चति च तं देशं नायको यत्र दृश्यते।
आगच्छति गृहं तस्य कार्यव्याजेन केनचित्॥१२२॥

दत्तं किमपि कान्तेन धृत्वाङ्गे मुहुरीक्षते।

नित्यं हृष्यति तद्योगे वियोगे मलिना कृशा॥ १२३॥

मन्यते बहु तच्छीलं तत्प्रियं मन्यते प्रियम्।
प्रार्थयत्यल्पमूल्यानि सुप्ता न परिवर्तते॥ १२४॥

विकारान्सात्त्विकानस्य सम्मुखीनाऽधिगच्छति।
भाषते सूनृतं स्निग्धमनुरक्ता नितम्बिनी॥ १२५॥

एतेष्वधिकलज्जानि चेष्टितानि नवस्त्रियाः।
मध्यव्रीडानि मध्यायाः स्त्रंसमानत्रपाणि तु॥ १२६॥

**अन्यस्त्रियाः प्रगल्भायास्तथा स्युर्वारयोषितः।**

दिङ्म्मात्रं यथा मम–

*'अन्तिकगतमपि मामियमनलोकयतीव हन्त दृष्ट्वापि।*
*सरसनखक्षतलक्षितमाविष्कुरुते भुजामूलम्।।'*

तथा–

**लेखाप्रस्थापनैः स्निग्धैर्वीक्षितैर्मृदुभाषितैः।। १२७।।**

**दूतीसंप्रेषणैर्नार्या भावाभिव्यक्तिरिष्यते।**

दूत्यश्च–

**दूत्यः सखी नटी दासी धात्रेयी प्रतिवेशिनी।। १२८।।**

**बाला प्रव्रजिता कारूः शिल्पिन्याद्याः स्वयं तथा।**

कारू रजकीप्रभृतिः। शिल्पिनी चित्रकारादिस्त्री। आदिशब्दात्ताम्बूलिक-गान्धिकस्त्रीप्रभृतयः तत्र सखी यथा–'श्वासान्मुञ्चति–' इत्यादि।

स्वयंदूती यथा मम–

*पन्थिअ पिआसिओ विअ लच्छीअसि जासि ता किमण्णत्तो।*
*ण मणापि वारओ इध अत्थि घरे घणारसं पिअन्ताणम्।।*

एताञ्च नायिकाविषये नायकानामपि दूत्यो भवन्ति।

दूतीगुणानाह–

**कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः।। १२९।।**

**माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः।**
**एता अपि यथौचित्यादुत्तमाधममध्यमाः।। १३०।।**

एता दूत्यः। अथ प्रतिनायकः–

**धीरोद्धतः पापकारी व्यसनी प्रतिनायकः।**

यथा–रामस्य रावणः। अथोद्दीपनविभावाः–

**उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये।। १३१।।**

च–

**आलम्बनस्य चेष्टाद्या देशकालादयस्तथा।**

NOTES

NOTES

चेष्टाद्या इत्याद्यशब्दाद्रूपभूषणादयः। कालादीत्यादिशब्दाञ्चन्द्रचन्दनकोकिलालापभ्रमरझंकारादयः। तत्र चन्द्रोदयो यथा मम–

*'करमुदयमहीधरस्तनाग्रे गलिततमःपटलांशुके निवेश्य।*
*विकसितकुमुदेक्षणं विचुम्बत्ययममरेशदिशो मुखं सुधांशुः।।'*

यो यस्य रसस्योद्दीपनविभावः स तत्स्वरूपवर्णने वक्ष्यते। अथानुभावाः–

**उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।। १३२।।**

**लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः।**

यः खलु लोके सीतादिचन्द्रादिभिः स्वैः स्वैरालम्बनोद्दीपनकारणै रामादेरन्तरुद्बुद्धं रत्यादिकं बहिः प्रकाशयन्कार्यमित्युच्यते, स काव्यनाट्ययोः पुनरनुभावः। कः पुनरसावित्याह–

**उक्ताः स्त्रीणामलंकारा अङ्गजाश्च स्वभावजाः।। १३३।।**

**तद्रूपाः सात्विका भावास्तथा चेष्टाः परा अपि।**

तद्रूपा अनुभावस्वरूपाः। तत्र ये, यस्य रसस्यानुभावः स तत्स्वरूपवर्णने वक्ष्यते। सात्त्विकाः–

**विकाराः सत्त्वसंभूताः सात्विकाः परिकीर्तिताः।। १३४।।**

सत्त्वं नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्मः।।

**सत्त्वमात्रोद्भवत्वात्ते भिन्ना अप्यनुभावतः।**

'गोबलीवर्दन्यायेन' इति शेषः। के त इत्याह–

**स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।। १३५।।**

**वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः।**

तत्र–

**स्तम्भश्चेष्टाप्रतीघातो भयहर्षामयादिभिः।। १३६।।**

**वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः।**
**हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया।। १३७।।**

**मदसंमदपीडाद्यैर्वैस्वर्यं गद्गदं विदुः।**
**रागद्वेषश्रमादिभ्यः कम्पो गात्रस्य वेपथुः।। १३८।।**

**विषादमदरोषाद्यैर्वर्णान्यत्वं विवणता।**
**अश्रु नेत्रोद्भवं वारि क्रोधदुःखप्रहर्षजम्।**
**प्रलयः सुखदुःखाभ्यां चेष्टाज्ञाननिराकृतिः॥ १३८॥**

यथा मम—

'तनुस्पर्शादस्या दरमुकुलिते हन्त नयने उदञ्चद्रोमाञ्चं व्रजति जडतामङ्गमखिलम्। कपोलौ घर्मार्द्रौ ध्रुवमुपरताशेषविषयं मनः सान्द्रानन्दं स्पृशति झटिति ब्रह्म परमम्॥'

एवमन्यत्। अथ व्यभिचारिणः—

**विशेषादाभिमुख्येन चरणाद्व्यभिचारिणः।**
**स्थायिन्युन्मग्ननिर्मग्नास्त्रयस्त्रिंशश्च तद्विदाः॥ १४०॥**

स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादयः प्रादुर्भावतिरोभावाभ्यामाभिमुख्येन चरणाद्व्यभिचारिणः कथ्यन्ते। के त इत्याह—

**निर्वेदावेगदैन्यश्रममदजडता औग्र्यमोहौ विबोधः**
**स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः।**
**औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसंत्रासलज्जा**
**हर्षासूयाविषादाः सधृतिचपलता ग्लानिचिन्तावितर्काः॥ १४१॥**

तत्र निर्वेदः—

**तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम्।**
**दैन्यचिन्ताश्रुनिःश्वासवैवर्ण्योच्छ्वसितादिकृत्॥ १४२॥**

तत्त्वज्ञानान्निर्वेदो यथा—

*'मृत्कुम्भबालुकारन्ध्रपिधानरचनार्थिना। दक्षिणावर्तशङ्खोऽयं हन्त चूर्णीकृतो मया॥'*

अथावेगः—

**आवेगः संभ्रमस्तत्र हर्षजे पिण्डिताङ्गता।**
**उत्पातजे स्रस्ततांगे धूमाद्याकुलताग्निजे॥ १४३॥**

**राजविद्रवजादेस्तु शस्त्रनागादियोजनम्।**
**गजादेः स्तम्भकम्पादि, पांस्वाद्याकुलतानिलात्॥ १४४॥**

**इष्टाद्धर्षाः शुचोऽनिष्टाज्ज्ञेयाश्चान्ये यथायथम्।**

NOTES

NOTES

तत्र शत्रुजो यथा–

*'अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनपेक्ष्य भरताग्रजो यतः।*
*क्षत्रकोपदहनार्चिषं ततः संदधे दृशमुदग्रतारकाम्।।'*

एवमन्यदूह्यम्। अथ दैन्यम्–

**दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत्।। १४५।।**

यथा–

*'वृद्धोऽन्धः पतिरेष मञ्चकगतः, स्थूणावशेषं गृहं,*
*कालोऽभ्यर्णजलागमः, कुशलिनी वत्सस्य वार्तापि नो।*
*यत्नात्संचिततैलबिन्दुघटिका भग्नेति पर्याकुला*
*दृष्ट्वा गर्भभरालसां निजबधूं श्वश्रूश्चिरं रोदिति।।'*

अथ श्रमः–

**खेदो रत्यध्वगत्यादेः श्वासनिद्रादिकृच्छ्रमः।**

यथा–

*'सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी सीता जवात्त्रिचतुराणि पदानि गत्वा।*
*गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा रामाश्रुणः कृतवती प्रथमावतारम्।।'*

अथ मदः–

**संमोहानन्दसंभेदो मदो मद्योपयोगजः।। १४६।।**

**अमुना चोत्तमः शेते, मध्यो हसति गायति।**
**अधमप्रकृतिश्चापि परुषं वक्ति रोदिति।। १४७।।**

यथा–

*'प्रातिभं त्रिसरकेण गतानां वक्रवाक्यरचनारमणीयः।*
*गूढसूचितरहस्यसहासः सुभ्रुवां प्रववृते परिहासः।।'*

अथ जडता–

**अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः।**
**अनिमिषनयननिरीक्षणतूष्णींभावादयस्तत्र।। १४८।।**

NOTES

यथा मम कुवलयाश्वचरिते प्राकृतकाव्ये–

*'णवरिअ तं जुअजुअलं अण्णोण्गं णिहिदसजलमन्थरदिट्ठिम्।*
*आलेक्खओपिअं विअ खणमेत्तं तत्थ संट्ठिअं मुअसण्म्।।'*

अथोग्रता–

**शौर्यापराधादिभवं भवेच्चण्डत्वमुग्रता।**
**तत्र स्वेदशिरःकम्पतर्जनाताडनादयः।। १४९।।**

यथा–

*'प्रणयिसखीसलीलपरिहासरसाधिगतैर्ललितशिरीषपुष्पहननैरपि ताम्यति यत्।*
*वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः पततु शिरस्यकाण्डयमदण्ड इवैष भुजः।।'*

अथ मोहः–

**मोहो विचित्तता भीतिदुःखावेगानुचिन्तनैः।**
**मूर्च्छनाज्ञानपतनभ्रमणादर्शनादिकृत्।। १५०।।**

यथा–

*'तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।*
*अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव।।'*

अथ विबोधः–

**निद्रापगमहेतुभ्यो विबोधश्चेतनागमः।**
**जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत्।। १५१।।**

यथा–

*'चिररतिपरिखेदप्राप्तनिद्रासुखानां चरममपि शयित्वा पूर्वमेव प्रबुद्धाः।*
*अपरिचलितगात्राः कुर्वते न प्रियाणामशिथिलभुजचक्राश्लेषभेदं तरुण्यः।।'*

अथ स्वप्नः–

**स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः।**
**कोपावेगभयग्लानिसुखदुःखादिकारकः।। १५२।।**

NOTES

यथा–

*‘मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोर्लब्धायास्ते कथमपि मया स्वप्नसंदर्शनेन।*

*पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति।।’*

अथापस्मारः–

**मनःक्षेपस्त्वपस्मारो ग्रहाद्यावेशनादिजः।**
**भूपातकम्पप्रस्वेदफेनलालादिकारकः।। १५३।।**

*‘आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरङ्गम्।*
*फेनायमानं पतिमापगानामसावपस्मारिणमाशशङ्के।।’*

अथ गर्वः–

**गर्वो मदः प्रभावश्रीविद्यासत्कुलतादिजः।**
**अवज्ञासविलासांगदर्शनाविनयादिकृत्।। १५४।।**

तत्र शौर्यगर्वो यथा–

*‘धृतायुधो यावदहं तावदन्यैः किमायुधैः।*
*यद्वा न सिद्धमस्त्रेण मम तत्केन साध्यताम्।।’*

अथ मरणम्–

**शराद्यैर्मरणं जीवत्यागोऽङ्गपतनादिकृत्।**

यथा–

*‘राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी।*
*गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा।।’*

अथालस्यम्–

**आलस्यं श्रमगर्भाद्यैर्जाड्यं जृम्भासितादिकृत्।। १५५।।**

यथा–

*‘न तथा भूषयत्यङ्गं न तथा भाषते सखीम्।*
*जृम्भते मुहुरासीना वाला गर्भभरालसा।।’*

NOTES

अथामर्षः–

**निन्दाक्षेपापमानादेरमर्षोऽभिनिविष्टता।**
**नेत्ररागशिरःकम्पभ्रूभङ्गोत्तर्जनादिकृत्।। १५६।।**

यथा–

*'प्रायश्चित्तं चरिष्यामि पूज्यानां वो व्यतिक्रमात्।*
*न त्वेवं दूषयिष्यामि शस्त्रग्रहमहाव्रतम्।।'*

अथ निद्रा–

**चेतःसंमीलनं निद्रा श्रमक्लममदादिजा।**
**जृम्भाक्षिमीलनोच्छ्वासगात्रभंगादिकारणम्।। १५७।।**

यथा–

*'सार्थकानर्थकपदं ब्रुवती मन्थराक्षरम्।*
*निद्रार्धमीलिताक्षी सा लिखितेवास्ति मे हृदि।।'*

अथावहित्था–

**भयगौरवलज्जादेर्हर्षाद्याकारगुप्तिरवहित्था।**
**व्यापारान्तरसक्त्यन्यथावभाषणविलोकनादिकरी।। १४८।।**

यथा–

*'एवंवादिनि देवर्षौ पार्श्वे पितुरधोमुखी।*
*लीलाकमलपत्राणि गणयामास पार्वती।।'*

अथौत्सुक्यम्–

**इष्टानवाप्तेरौत्सुक्यं कालक्षेपासहिष्णुता।**
**चित्ततापत्वरास्वेददीर्घनिःश्वसितादिकृत्।। १५६।।**

यथा–'यः कौमारहरः स एव हि वरः–' इत्यादि।

अत्र यत् काव्यप्रकाशकारेण रसस्य प्राधान्यमित्युक्तं तद्रसनधर्मयोगित्वाद् व्यभिचारिभावस्यापि रसशब्दवाच्यत्वेन गतार्थं मन्तव्यम्। अथोन्मादः–

**चित्तसंमोह उन्मादः कामशोकभयादिभिः।**
**अस्थानहासरुदितगीतप्रलपनादिकृत्।। १६०।।**

NOTES

यथा मम–

'भ्रातर्द्विरेफ, भवता भ्रमता। समन्तात्प्राणाधिका प्रियतमा मम वीक्षिता किम्। (झंकारमनुभूय सानन्दम्।)

ब्रूषे किमोमिति सखे, कथयाशु तन्मे किं किं व्यवस्यति कुतोऽस्ति च कीदृशीयम्।।'

अथ शङ्का–

**परक्रौर्यात्मदोषाद्यैः शङ्काऽनर्थस्य तर्कणम्।**
**वैवर्ण्यकम्पवैस्वर्यपार्श्वालोकास्यशोषकृत्।। १६१।।**

यथा मम–

*'प्राणेशेन प्रहितनखरेष्वङ्गकेषु क्षपान्ते जातातङ्का रचयति चिरं चन्दनालेपनानि। धत्ते लाक्षामसकृदधरे दत्तदन्तावधाते क्षामाङ्गीयं चकितमभितश्चक्षुषी विक्षिपन्ती।।'*

अथ स्मृतिः–

**सदृशज्ञानचिन्ताद्यैर्भ्रूसमुन्नयनादिकृत्।**
**स्मृतिः पूर्वानुभूतार्थविषयज्ञानमुच्यते।। १६२।।**

यथा मम–

*'मयि सकपटं किंचित्क्वापि प्रणीतविलोचने किमपि नयनं प्राप्ते तिर्यग्विजृम्भिततारकम्। स्मितमुपगतामालीं दृष्ट्वा सलज्जमवाञ्चितं कुवलयदृशः स्मेरं स्मेरं स्मरामि तदाननम।।'*

अथ मतिः–

**नीतिमार्गानुसृत्यादेरर्थनिर्धारणं मतिः।**
**स्मेरता धृतिसन्तोषौ बहुमानश्च तद्भवाः।। १६३।।**

यथा–

'असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः।
सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः।।'

अथ व्याधिः–

**व्याधिर्ज्वरादिर्वाताद्यैर्भूमीच्छोत्कम्पनादिकृत्।**

NOTES

तत्र दाहमयत्वे भूमीच्छादयः। शैत्यमयत्वे उत्कम्पनादयः। स्पष्टमुदादृरणम्। अथ त्रासः–

**निर्घातविद्युदुल्काद्यैस्त्रासः कम्पादिकारकः॥ १६४॥**

यथा–

*'परिस्फुरन्मीनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः।*
*उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम्॥'*

अथ ब्रीडा–

**धाष्ट्याभावो व्रीडा वदनानमनादिकृद् दुराचारात्।**

यथा–'मयि सकपटम्–' इत्यादि। अथ हर्षः–

**हर्षस्त्विष्टावाप्तेर्मनःप्रसादोऽश्रुगद्गदादिकरः॥ १६५॥**

यथा–

*'समीक्ष्य पुत्रस्य चिरात्पिता मुखं निधानकुम्भस्य यथैव दुर्गतः।*
*मुदा शरीरे प्रबभूव नात्मनः पयोधिरिन्दूदयमूर्च्छितो यथा॥'*

अथासूया–

**असूयान्यगुणर्द्धीनामौद्धत्यादसहिष्णुता।**
**दोषोद्धोषभ्रूविभेदावज्ञाक्रोधेङ्गितादिकृत्॥ १६६॥**

यथा–

*'अथ तत्र पाण्डुतनयेन सदसि विहितं मधुद्विषः।*
*मानमसहत न चेदिपतिः परवृद्धिमत्सरि मनो हि मानिनाम्॥'*

अथ विषादः–

**उपायाभावजन्मा तु विषादः सत्वसंक्षयः।**
**निःश्वासोच्छ्वासहृत्तापसहायान्वेषणादिकृत्॥ १६७॥**

यथा मम–

*'एसा कुडिलघणेण चिउरकडप्पेण तुह णिबद्धा बेणी।'*
*मम सहि दारइ डंसइ आअसजट्टिव्व कालउरइव्व हिअअम्॥*

NOTES

अथ धृतिः–

**ज्ञानाभीष्टागमाद्यैस्तु संपूर्णस्पृहता धृतिः।**
**सौहित्यवचनोल्लाससहासप्रतिभादिकृत्॥ १६८॥**

यथा मम–

*'कृत्वा दीननिपीडनां निजजने बद्ध्वा वचोविग्रहं*
*नैवालोच्य गरीयसीरपि चिरादामुष्मिकीर्यातनाः।*
*द्रव्यौघाः परिसंचिताः खलु मया यस्याः कृते सांप्रतं*
*नीवाराञ्जलिनापि केवलमहो सेयं कृतार्था तनुः॥'*

अथ चपलता–

**मात्सर्यद्वेषरागादेश्चापल्यं त्वनवस्थितिः।**
**तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणादयः॥ १६९॥**

यथा–

*'अन्यासु तावदुपमर्दसहासु भृङ्ग, लोलं विनोदय मनः सुमनोलतासु।*
*मुग्धामजातरजसं कलिकामकाले व्यर्थं कदर्थयसि किं नवमालिकायाः॥'*

अथ ग्लानिः–

**रत्यायासमनस्तापक्षुत्पिपासादिसंभवा।**
**ग्लानिर्निष्प्राणता कम्पकार्यानुत्साहतादिकृत्॥ १७०॥**

यथा–

*'किसलयमिव मुग्धं बन्धनाद्विप्रलूनं हृदयकुसुमशोषी दारुणो दीर्घशोकः।*
*ग्लपयति परिपाण्डुक्षाममस्याः शरीरं शरदिज इव घर्मः केतकीगर्भपत्रम्॥'*

अथ चिन्ता–

**ध्यानं चिन्ता हितानाप्तेः शून्यताश्वासतापकृत्।**

यथा मम–

*'कमलेण विअसिएण रंजोएन्ती विरोहिणं ससिबिम्बम्।*
*करअलपल्लत्थमुही किं चिन्तसि सुमुहि अन्तराहिअहिअआ॥'*

अथ वितर्कः–

**तर्को विचारः संदेहाद् भ्रूशिरोंगुलिनर्तकः॥ १७१॥**

NOTES

यथा–'किं रुद्धः प्रियया–' इत्यादि।

एते च त्रयस्त्रिंशद् व्यभिचारिभेदा इति यदुक्तं तदुपलक्षणमित्याह्–

**रत्यादयोऽप्यानियते रसे स्युर्व्यभिचारिणः।**

तथाहि शृङ्गारेऽनुच्छिद्यमानतयावस्थानाद् रतिरेव स्थायिशब्दवाच्या। हासः पुनरुत्पद्यमानो व्यभिचार्येव। व्यभिचारिलक्षणयोगात्। तदुक्तम्–

**'रसावस्थः परं भावः स्थायितां प्रतिपद्यते।' इति।**

तत्कस्य स्थायिनः कस्मिन्रसे संचारित्वमित्याह–

**शृंगारवीरयोर्हासो वीरे क्रोधस्तथा मतः॥ १७२॥**

**शान्ते जुगुप्सां कथिता व्यभिचारितया पुनः।**
**इत्याद्यन्यत्समुन्नेयं तथा भावितबुद्धिभिः॥ १७३॥**

अथ स्थायिभावः–

**अविरुद्धा विरुद्धा वा यं तिरोधातुमक्षमाः।**
**आस्वादाङ्कुरकन्दोऽसौ भावः स्थायीति संमतः॥ १७४॥**

यदुक्तम–

*'स्रक्सूत्रवृत्त्या भावानामन्येषामनुगामकः।*
*न तिरोधीयते स्थायी तैरसौ पुष्यते परम्॥'* इति।

तद्भेदानाह–

**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।**
**जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥ १७५॥**

तत्र–

**रतिर्मनोनुकूलेऽथे मनसः प्रवणायितम्।**
**वागादिवैकृतैश्चेतोविकासौ हास इष्यते॥ १७६॥**

**इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्।**
**प्रतिकूलेषु तैक्ष्ण्यस्यावबोधः क्रोध इष्यते॥ १७७॥**

**कार्यारम्भेषु संरम्भः स्थेयानुत्साह उच्यते॥**
**रौद्रशक्त्या तु जनितं चित्तवैक्लव्यदं भयम्॥ १७८॥**

NOTES

**दोषेक्षणादिभिर्गर्हा जुगुप्सा विषयोद्भवा।**
**विविधेषु पदार्थेषु लोकसीमातिवर्तिषु॥ १७९॥**

**विस्फारश्चेतसो यस्तु स विस्मय उदाहृतः।**
**शमो निरीहावस्थायां स्वात्मविश्रामजं सुखम्॥ १८०॥**

यथा मालतीमाधवे रतिः। लटकमेलके हासः। रामायणे शोकः। महाभारते शमः। एवमन्यत्रापि। एते ह्येतैष्वन्तरा उत्पद्यमानैस्तैस्तैर्विरुद्धैरविरुद्धैश्च भावैरनुच्छिन्नाः प्रत्युत परिपुष्टा एव सहृदयानुभवसिद्धाः। किं च–

**नानाभिनयसंबन्धान्भावयन्ति रसान् यतः।**
**तस्माद्भावा अमी प्रोक्ताः स्थायिसंचारिसात्त्विकाः॥ १८१॥**

यदुक्तम्–

**'सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम्।'**

अथ रसस्य भेदानाह–

**श्रृंगारहास्यकरुणरौत्वीरभयानकाः।**
**बीभत्सोऽद्भ्रुत इत्यष्टौ रसाः शान्तस्तथा मतः॥ १८२॥**

तत्र श्रृङ्गारः–

**श्रृंगं हि मन्मथोद्भेदस्तदागमनहेतुकः।**
**उत्तमप्रकृतिप्रायो रसः श्रृंगार इष्यते॥ १८३॥**

**परोढां वर्जयित्वा तु वेश्यां चाननुरागिणीम्।**
**आलम्बनं नायिकाः स्युर्दक्षिणाद्याश्च नायकाः॥ १८४॥**

**चन्द्रचन्दनरोलम्बरुताद्युद्दीपनं मतम्।**
**भ्रूविक्षेपकटाक्षादिरनुभावः प्रकीर्तितः॥ १८५॥**

**त्यक्त्वौग्र्यमरणालस्यजुगुप्सा व्यभिचारिणः।**
**स्थायिभावो रतिः श्यामवर्णोऽयं विष्णुदैवतः॥**

**यथा–**'शून्यं वासगृहम्'–इत्यादि। अत्रोक्तस्वरूपः पतिः उक्तस्वरूपा च बाला आलम्बनविभावौ। शून्यं वासगृहमुद्दीपनविभावः। चुम्बनमनुभावः। लज्जाहासौ व्यभिचारिणौ। एतैरभिव्यक्तः सहृदयविषयो रतिभावः श्रृङ्गाररसरूपतां भजते। तद्भेदानाह–

**विप्रलम्भोऽथ संभोग इत्येष द्विविधो मतः॥ १८६॥**

NOTES

तत्र–

**यत्र तु रति प्रकृष्टा नाभीष्टमुपैति विप्रलम्भोऽसौ।**

अभीष्टं नायकं नायिकां वा।

**स च पूर्वरागमानप्रवासकरुणात्मकश्चतुर्धा स्यात्॥ १८७॥**

तत्र–

**श्रवणाद्दर्शनाद्वापि मिथः संरूढरागयोः।**
**दशाविशेषो योऽप्राप्तो पूर्वरागः स उच्यते॥ १८८॥**

**श्रवणं तु भवेत्तत्र दूतवन्दीसखीमुखात्।**
**इन्द्रजाले च चित्रे च साक्षात्स्वप्ने च दर्शनम्॥ १८९॥**

**अभिलाषश्चिन्तास्मृतिगुणकथनोद्वेगसंप्रलापाश्च।**
**उन्मादोऽथ व्याधिर्जडता मृतिरिति दशात्र कामदशाः॥ १९०॥**

**अभिलाषः स्पृहा, चिन्ता प्राप्त्युपायादिचिन्तनम्।**
**उन्मादश्चापरिच्छेदश्चेतनाचेतनेष्वपि॥ १९१॥**

**अलक्ष्यवाक्प्रलापः स्याञ्चेतसो भ्रमणाद् भृशम्।**
**व्याधिम्तु दीर्घनिःश्वासपाण्डुताकृशतादयः॥ १९२॥**

**जडता हीनचेष्टत्वमङ्गानां मनसस्तथा।**

शेषं स्पष्टम। क्रमेणोदाहरणानि–

*'प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया–*
*स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।*
*यास्वन्तःकरणस्य बाह्यकरणव्यापाररोधी क्षणा–*
*दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः॥'*

अत्र मालतीसाक्षाद्दर्शनप्ररूढरागस्य माधवस्याभिलाषः।

*'कथमीक्षे कुरङ्गाक्षीं साक्षाल्लक्ष्मीं मनोभुवः।*
*इति चिन्ताकुलः कान्तो निद्रां नैति निशीथिनीम्॥'*

अत्र कस्याश्चिन्नायिकाया इन्द्रजालदर्शनप्ररूढरागस्य नायकस्य चिन्ता। इदं मम। 'मयि सकपटम्–' इत्यादौ नायकस्य स्मृतिः। 'नेत्रे खञ्जनगञ्जने–' इत्यादौ गुणकथनम्। 'श्वासान्मुञ्चति–' इत्यादौ उद्वेगः।

NOTES

*'त्रिभागशेषासु निशासु च क्षणं निमील्य नेत्रे सहसा व्यबुध्यत।*
*क्व नीलकण्ठ, व्रजसीत्यलक्ष्यवागसत्यकण्ठार्पितबाहुबन्धना।।'*

अत्र प्रलापः। 'भ्रातर्द्विरेफ–' इत्यादावुन्मादः।

*'पाण्डु क्षामं वदनं हृदयं सरसं तवालसं च वपुः।*
*आवेदयति नितान्तं क्षेत्रियरोगं सखि हृदन्तः।।'*

अत्र व्याधिः।

*'भिसिणीअलसअणीए निहिअं सव्वं सुणिश्चलं अङ्गम्।*
*दीहो णीसासहरो एसो साहेइ जीअइत्ति परम्।।'*

अत्र जडता। इदं मम।

**रसविच्छेदहेतुत्वान्मरणं नैव वर्ण्यते॥ १९३॥**

**जातप्रायं तु तद्वाच्यं चेतसाकाङ्क्षितं तथा।**
**वर्ण्यतेऽपि यदि प्रत्युज्जीवनं स्याददूरतः॥ १९४॥**

तत्राद्यं यथा–

*'शेफालिकां विदलितामवलोक्य तन्वी प्राणान्कथंचिदपि धारयितुं प्रभूता।*
*आकर्ण्य संप्रति रुतं चरणायुधानां किं वा भविष्यति न वेद्मि तपस्विनी सा।।'*

द्वितीयं यथा–

*'रोलम्बाः परिपूरयन्तु हरितो झंकारकोलाहलै–*
*र्मन्दं मन्दमुपैतु चन्दनवनीजातो नभस्वानपि।*
*माद्यन्तः कलयन्तु चूतशिखरे केलीपिकाःपञ्चमं*
*प्राणाः सत्वरमश्मसारकठिना गच्छन्तु गच्छन्त्वमी।।'*

ममैतौ। तृतीयं यथा–कादम्बर्या महाश्वेतापुण्डरीकवृत्तान्ते। एष च प्रकारः करुणविप्रलम्भविषय इति वक्ष्यामः। केचित्तु–

'नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ संकल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः।

उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः।' इत्याहुः। तत्र च–

**आदौ वाच्यः स्त्रिया रागः पुंसः पश्चात्तदिंगितैः।**

इङ्गितान्युक्तानि यथा रत्नावल्यां सागरिकावत्सराजयोः। आदौ पुरुषानुरागे संभवत्यप्येवमधिकं हृदयंगमं भवति।

**नीली कुसुम्भं मञ्जिष्ठा पूर्वरागोऽपि च त्रिधा॥ १९५॥**

तत्र–

**न चातिशोभते यन्नापैति प्रेम मनोगतम्।**
**तन्नीलीरागमाख्यातं यथा श्रीरामसीतयोः॥ १९६॥**

**कुसुम्भरागं तत्प्राहुर्यदपैति च शोभते।**
**मञ्जिष्ठारागमाहुस्तद् यन्नापैत्यतिशोभते॥ १९७॥**

अथ मानः–

**मानः कोपः रा तु द्वेघा प्रणयेर्ष्यासमुद्भवः।**
**द्वयोः प्रणयमानः स्यात्प्रमोदे सुमहत्यपि॥ १९८॥**

**प्रेम्णः कुटिलगामित्वात्कोपो यः कारणं विना।**

द्वयोरिति नायकस्य नायिकायाश्च उभयोश्च प्रणयमानो वर्णनीयः। उदाहरणम्। तत्र नायकस्य यथा–

*'अलिअपसत्त अणिमीलिअच्छ देसु सुहअ मज्झ ओआसम्।*
*गण्डपरिउम्बणपुलइअङ्गण उष्णो चिराइस्सम्।।'*

नायिकाया यथा कुमारसंभवे संध्यावर्णनावसरे। उभयोर्यथा–

*'पणअकुविआणँ दोष्णं वि अलिअसुत्ताष्णँ माणाइणाणम्।*
*रिश्चलणिरुद्धणीसासदिष्णअष्णाणँ को मल्लो।।'*

अनुनयपर्यन्तासहत्वे त्वस्य न विप्रलम्भभेदता, किंतु संभोगसंचार्याख्यभावत्वम्। यथा–

*'भ्रूभङ्गे रचितेऽपि दृष्टिरधिकं सोत्कण्ठमुद्वीक्षते*
*रुद्धायामपि वाचि सस्मितमिदं दग्धाननं जायते।*
*कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते*
*दृष्टे निर्वहणं भविष्यति कथं मानस्य तस्मिञ्जने।।'*

यथा वा–

*'एकस्मिञ्शयने पराङ्मुखतया वीतोत्तरं ताम्यतो–*
*रन्योन्यस्य हृदि स्थितेऽप्यनुनये संरक्षतोर्गौरवम्।*
*दंपत्योः शनकैरपाङ्गवलनान्मिश्रीभवञ्चक्षुषो–*
*र्भग्नो मानकलिः सहासरभसव्यासक्तकण्ठग्रहः।।'*

NOTES

NOTES

**पत्युरन्यप्रियासङ्गे दृष्टेऽथानुमिते श्रुते॥ १९९॥**

**ईर्ष्यामानो भवेत्स्त्रीणां तत्र त्वनुमितिस्त्रिधा।**
**उत्स्वप्नायितभोगाङ्कगोत्रस्खलनसंभना॥ २००॥**

तत्र दृष्टे यथा–

*'विनयति सुदृशो दृशोः परागं प्रणयिनि कौसुममाननानिलेन।*
*तदहितयुवतेरभीक्ष्णमक्ष्णोर्द्वयमपि रोषरजोभिरापुपूरे॥'*

संभोगचिह्नेनानुमिते यथा–

*'नवनखपदमङ्गं गोपयस्यंशुकेन स्थगयसि पुनरोष्ठं पाणिना दन्तदष्टम्।*
*प्रतिदिशमपरस्त्रीसङ्गशंसी विसर्पन्नवपरिमलगन्धः केन शक्यो वरीतुम्॥'*

एवमन्यत्र।

**साम भेदोऽथ दानं च नत्युपेक्षे रसान्तरम्।**
**तद्भङ्गाय पतिः कुर्यात्षडुपायानिति क्रमात्॥ २०१॥**

**तत्र प्रियवचः साम, भेदस्तत्सख्युपार्जनम्।**
**दानं व्याजेन भूषादेः, पादयोः पतनं नतिः॥ २०२॥**

**सामादौ तु परिक्षीणे स्यादुपेक्षावधीरणम्।**
**रभसत्रासहर्षादेः कोपभ्रंशो रसान्तरम्॥ २०३॥**

यथा–'नो चाटुश्रवणं कृतम्–' इत्यादि। अत्र सामादयः पञ्च सूचिताः। रसान्तरमूह्यम्।

अथ प्रवासः–

**प्रवासो भिन्नदेशित्वं कार्याच्छापाज्च संभ्रमात्।**
**तत्राङ्गचेलमालिन्यमेकवेणीधरं शिरः॥ २०४॥**

**निःश्वासोच्छ्वासरुदितभूमिपातादि जायते॥**

**किं च।**

**अङ्गेष्वसौष्ठवं तापः पाण्डुता कृशताऽरुचिः॥ २०५॥**

**अधृतिः स्यादनालम्बस्तन्मयोन्मादमूर्च्छनाः।**
**मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इह॥ २०६॥**

**असौष्ठवं मलापत्तिस्तापस्तु विरहज्वरः।**
**अरुचिर्वस्तुवैराग्यं सर्वत्रारागिता धृतिः॥ २०७॥**

**अनालम्बनता चापि शून्यता मनसः स्मृता।**

**तन्मयं तत्प्रकाशो हि बाह्याभ्यन्तरतस्तथा।**

शेषं स्पष्टम्। एकदेशतो यथा मम तातपादानाम्–

'चिन्ताभिः स्तिमितं मनः, करतले लीला कपोलस्थली,
प्रत्यूषक्षणदेशपाण्डु वदनं, श्वासैकखिन्नोऽधरः।
अम्भःशीकरपद्मिनीकिसलयैर्नापैति तापः शमं
कोऽस्याः प्रार्थितदुर्लभोऽस्ति सहते दीनां दशामीदृशीम्।।'

**भावी भवन्भूत इतिं त्रिधा स्यात्तत्र कार्यजः॥ २०८॥**

कार्यस्य बुद्धिपूर्वकत्वात्त्रैविध्यम्। तत्र भावी यथा मम–

*'यामः सुन्दरि, याहि पान्थ, दयिते शोकं वृथा मा कृथाः,*
*शोकस्ते गमने कुतो मम, ततो बाष्पं कथं मुञ्चसि।*
*शीघ्रं न व्रजसीति, मां गमयितुं कस्मादियं ते त्वरा,*
*भूयानस्य सह त्वया जिगमिषोर्जीवस्य मे संभ्रमः।।'*

भवन्यथा–

*'प्रस्थानं वलयैः कृतं, प्रियसखैरस्त्रैरजस्त्रं गतं,*
*धृत्या न क्षणमासितं, व्यवसितं चित्तेन गन्तुं पुरः।*
*यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता*
*गन्तव्ये सति जीतिव, प्रियसुहृत्सार्थः किमु त्यज्यते।।'*

भूतो यथा–'चिन्ताभिः स्तिमितम्–' इत्यादि। शापाद्यथा–'तां जानीथाः–' इत्यादि। संभ्रमो दिव्यमानुषनिर्घातोत्पातादिजः। यथा–विक्रमोर्वश्यामुर्वशीपुरूरवसोः।

अत्र पूर्वरागोक्तानामभिलाषादीनामत्रोक्तानां चाङ्गासौष्ठवादीनामपि दशानामुभयेषामष्युभयत्र संभवेऽपि चिरंतनप्रसिद्ध्या विविच्य प्रतिपादनम्।

अथ करुणविप्रलम्भः–

**यूनोरेकतरस्मिन्गतवति लोकान्तरं पुनर्लभ्ये।**
**विमनायते यदैकस्तदा भवेत्करुणविप्रलम्भाख्यः॥ २०९॥**

NOTES

NOTES

यथा कादम्बर्यां पुण्डरीकमहाश्वेतावृत्तान्ते। पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणख्य एव रस:।

किंचात्राकाशसरस्वतीभाषानन्तरमेव शृङ्गार:, संगमप्रत्याशया रतेरुद्भवात्। प्रथमं तु करुण एव इत्यभियुक्ता मन्यन्ते। मश्चात्र 'संगमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेद एव' इति केचिदाहु:, तदन्ये 'मरणरूप-विशेषसंभवात्तद्भिन्नमेव' इति मन्यन्ते अथ संभोग:–

**दर्शनस्पर्शनादीनि निषेवेते विलासिनौ।**
**यत्रानुरक्तावन्योन्यं संभोगोऽयमुदाहृत:॥ २१०॥**

आदिशब्दादन्योन्याधरपानचुम्बनादय:। यथा–'शून्यं वासगृहम्'–इत्यादि।

**संख्यातुमशक्यतया चुम्बनपरिरम्भणादिबहुभेदात्।**
**अयमेक एव धीरै: कथित: संभोगशृङ्गार:॥ २११॥**

**तत्र स्यादृतुषट्कं चन्द्रादित्यौ तथोदयास्तमय:।**
**जलकेलिवनविहारप्रभातमधुपानयामिनीप्रभृति:॥ २१२॥**

**अनुलेपनभूषाद्या वाच्यं शुचि मेध्यमन्यच्च।**

तथा च भरत:–'यत्किंचिल्लोके शुचि मेध्यमुज्ज्वलं दर्शनीयं वा तत्सर्वं शृङ्गारेणोपमीयते (उपयुज्यते च)' इति। किं च–

**कथितश्चतुर्विधोऽसावानन्तर्यात्तु पूर्वरागादे:॥ २१३॥**

यदुक्तम्–

'न बिना विप्रलम्भेन संभोग: पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान्रागो विवर्धते।।' इति।

तत्र पूर्वरागानन्तरं संभोगो यथा कुमारसंभवे पार्वतीपरमेश्वरयो:।

प्रवासानन्तरं संभोगो यथा मम तातपादानाम्–

*'क्षेमं ते ननु पक्ष्मलाक्षि–किसअं खेमं महङ्गं दिढं,*
*एतादृक्कृशता कुत:–तुह पुणो पुट्ठं सरीरं जदो।*
*केनाहं पृथुल: प्रिये–पणाइणीदेहस्स संमीलणात्,*
*त्वत्त:सुभ्रु न कापि मे–जइ इदं खेमं कुदो पुच्छसि।।'*

एवमन्यत्राप्यूह्यम्। अथ हास्यः–

**विकृताकारवाग्वेषचेष्टादेः कुहकाद्भवेत्।**
**हास्यो हासस्थायिभावः श्वेः प्रमथदैवतः॥ २१४॥**

**विकृताकारवाक्चेष्टं यमलोक्य हसेज्जनः।**
**तदत्रालम्बनं प्राहुस्तञ्चेष्टोद्दीपनं मतम्॥ २१५॥**

**अनुभावोऽक्षिसंकोचवदनस्मेरतादयः।**
**निद्रालस्यावहित्थाद्या अत्र स्युर्व्यभिचारिणः॥ २१६॥**

**ज्येष्ठानां स्मितहसिते मध्यानां विहसितावहसिते च।**
**नीचानामपहसितं तथातिहसितं तदेष षड्भेदः॥ २१७॥**

**ईषद्विकासिनयनं स्मितं स्यात्स्पन्दिताधरम्।**
**किंचिल्लक्ष्यद्विजं तत्र हसितं कथितं बुधैः॥ २१८॥**

**मधुरस्वरं विहसितं सांसशिरःकम्पमवहसितम्।**
**अपहसितं सास्त्राक्षं विक्षिप्ताङ्गं [ च ] भवत्यातिहसितम्॥ २१९॥**

यथा–

*'गुरोर्गिरः पञ्च दिनान्यधीत्य वेदान्तशास्त्राणि दिनत्रयं च।*
*अमी समाघ्राय च तर्कवादान् समागताः कुक्कुटमिश्रपादाः॥'*

अस्य लटकमेलकप्रभृतिषु परिपोषो द्रष्टव्यः। अत्र च–

**यस्य हासः स चेत्क्वापि साक्षान्नैव निबध्यते।**

**तथाप्येष विभावादिसामर्थ्यादुपलभ्यते॥ २२०॥**

**अभेदेन विभावादिसाधारण्यात्प्रतीयते।**

**सामाजिकैस्ततो हास्यरसोऽयमनुभूयते॥ २२१॥**

एवमन्येष्वपि रसेषु बोद्धव्यम्। अथ करुणः–

**इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत्।**
**धीरैः कपोतवर्णोऽयं कथितो यमदैवतः॥ २२२॥**

**शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम्।**
**तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः॥ २२३॥**

NOTES

NOTES

**अनुभावा दैवनिन्दाभूपातक्रन्दितादयः।**
**वैवर्ण्योच्छ्वासनिःश्वासस्तम्भप्रलपनानि च॥ २२४॥**

**निर्वेदमोहापस्माख्याधिग्लानिस्मृतिश्रमाः।**
**विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः॥ २२५॥**

शोच्यं विनष्टबन्धुप्रभृति। यथा मम राघवविलासे–

*'विपिने क्व जटानिबन्धनं तव चेदं क्व मनोहरं वपुः।*
*अनयोर्घटना विधेः स्फुटं ननु खड्गेन शिरीषकर्तनम्॥'*

अत्र हि रामवनवासजनितशोकार्तस्य दशरथस्य दैवनिन्दा। एवं बन्धुवियोग-विभवनाशादावप्युदाहार्यम्। परिपोषस्तु महाभारते स्त्रीपर्वणि द्रष्टव्यः।

अस्य करुणविप्रलम्भाद्भेदमाह–

**शोकस्थायितया भिन्नो विप्रलम्भादयं रसः।**
**विप्रलम्भे रतिः स्थायी पुनः संभोगहेतुकः॥ २२६॥**

अथ रौद्रः–

**रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः।**
**आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम्॥ २२७॥**

**मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव।**
**संग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत्प्रौढा॥ २२८॥**

**भ्रूविभङ्गौष्ठनिर्दंशबाहुस्फोटनतर्जनाः।**
**आत्मावदानकथनमायुधोत्क्षेपणानि च॥ २२९॥**

**उग्रतावेगरोमाञ्चस्वेदवेपथवो मदः।**
**अनुभावास्तथाक्षेपक्रूरसंदर्शनादयः॥ २३०॥**

**मोहामर्षादयस्तत्र भावाः स्युर्व्यभिचारिणः।**

यथा–

*'कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकं मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।*
*नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमसृङ्मेदोमांसैः करोमि दिशां बलिम्॥'*

NOTES

अस्य युद्धवीराद्भेदमाह–

**रक्तास्यनेत्रता चात्र भेदिनी युद्धवीरतः॥ २३१॥**

अथ वीरः–

**उत्तमप्रकृतिर्वीर उत्साहस्थायिभावकः।**
**महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः॥ २३२॥**

**आलम्बनविभावास्तु विजेतव्यादयो मताः।**
**विजेतव्यादिचेष्टाद्यास्तस्योद्दीपनरूपिणः।**
**अनुभावास्तु तत्र स्युः सहायान्वेषणादयः॥ २३३॥**

**संचारिणस्तु धृतिमतिगर्वस्मृतितर्करोमाञ्चाः।**
**स च दानधर्मयुद्धैर्दयया च समन्वितश्चतुर्धा स्यात्॥ २३४॥**

स च वीरो दानवीरो, धर्मवीरो, युद्धवीरो, दयावीरश्चेति चतुर्विधः। तत्र दानवीरो यथा परशुरामः–

*'त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः' इति।*

अत्र परशुरामस्य त्यागे उत्साहः स्थायिभावः संप्रदानभूतब्राह्मणैरालम्बनविभावैः सत्त्वाध्यवसायादिभिश्चोद्दीपनविभावैर्विभावितः। सर्वस्वत्यागादिभिरनुभावैरनुभावितो हर्षधृत्यादिभिः संचारिभिः पुष्टिं नीतो दानवीरतां भजते।

धर्मवीरो यथा युधिष्ठिरः–

*'राज्यं च वसु देहश्च भार्या भ्रातृसुताश्च ये।*
*यश्च लोके ममायत्तं तद्धर्माय सदोद्यतम्॥'*

युद्धवीरो यथा श्रीरामचन्द्रः–

*'भो लङ्केश्वर, दीयतां जनकजा, रामः स्वयं याचते,*
*कोऽयं ते मतिविभ्रमः, स्मर नयं, नाद्यापि किंचिद्गतम्।*
*नैवं चेत्खरदूषणत्रिशिरसां कण्ठासृजा पङ्किलः*
*पत्री नैष सहिष्यते मम धनुर्ज्याबन्धबन्धूकृतः॥'*

दयावीरो यथा जीमूतवाहनः–

*'शिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति।*
*तृप्तिं न पश्यामि तवापि तावत्किं भक्षणात्त्वं विरतो गरुत्मन्॥'*

NOTES

एष्वपि विभावादयः पूर्वोदाहरणवदूह्याः। अथ भयानकः—

**भयानको भयस्थायिभावः कालाधिदैवतः।**
**स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः॥ २३५॥**

**यस्मादुत्पद्यते भीतिस्तदत्रालम्बनं मतम्।**
**चेष्टा घोरतरास्तस्य भवेदुद्दीपनं पुनः॥ २३६॥**

**अनुभावोऽत्र वैवर्ण्यगद्गदस्वरभाषणम्।**
**प्रलयस्वेदरोमाञ्चकम्पदिक्प्रेक्षणादयः॥ २३७॥**

**जुगुप्सावेगसंमोहसंत्रासग्लानिदीनताः।**
**शङ्कापस्मारसंभ्रान्तिमृत्य्वाद्या व्यभिचारिणः॥ २३८॥**

यथा—'नष्टं वर्षवरैः—' इत्यादि।

अथ बीभत्सः—

**जुगुप्सास्थायिभावस्तु बीभत्सः कथ्यते रसः।**
**नीलवर्णो महाकालदैवतोऽयमुदाहृतः॥ २३९॥**

**दुर्गन्धमांसरुधिरमेदांस्यालम्बनं मतम्।**
**तत्रैव कृमिपाताद्यमुद्दीपनमुदाहृतम्॥ २४०॥**

**निष्ठीवनास्यवलननेत्रसंकोचनादयः।**
**अनुभावास्तत्र मतास्तथा स्युर्व्यभिचारिणः॥ २४१॥**

**मोहोऽपस्मार आवेगो व्याधिश्च मरणादयः।**

यथा— *'उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोथभूयांसि मांसा-*
*न्यंसस्फिक्पृष्ठपिण्डाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।*
*आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-*
*दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥'*

अथाद्भुतः—

**अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः॥ २४२॥**

**पीतवर्णो, वस्तु लोकातिगमालम्बनं मतम्।**
**गुणानां तस्य महिमा भवेदुद्दीपनं पुनः॥ २४३॥**

**स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः।**
**तथा नेत्रविकासाद्या अनुभावाः प्रकीर्तिताः॥ २४४॥**

NOTES

**वितर्कावेगसंभ्रान्तिहर्षाद्या व्यभिचारिणः।**

यथा– *'दो र्दण्डाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यत-*
*ष्टंकारध्वनिरार्यबालचरितप्रस्तावनाडिण्डिमः।*
*द्राक्पयस्तकपालसंपुटमिलद्ब्रह्माण्डभाण्डोदर-*
*भ्राम्यत्पिण्डितचण्डिमा कथमहो नाद्यापि विश्राम्यति'।।*

अथ शान्तः–

**शान्तः शमस्थायिभाव उत्तमप्रकृतिर्मतः।। २४५।।**

**कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः।**
**अनित्यत्वादिनाऽशेषवस्तुनिःसारता तु या।। २४६।।**

**परमात्मस्वरूपं वा तस्यालम्बनमिष्यते।**
**पुण्याश्रमहरिक्षेत्रतीर्थरम्यवनादयः।। २४७।।**

**महापुरुषसङ्गाद्यास्तस्योद्दीपनरूपिणः।**
**रोमाञ्चाद्याश्चानुभावास्तथा स्युर्व्यभिचारिणः।। २४८।।**

**निर्वेदहर्षस्मरणमतिभूतदयादयः।**

यथा–

*'रथ्यान्तश्चरतस्तथा धृतजरत्कन्थालवस्याध्वगैः*
*सत्रासं च सकौतुकं च सदयं दृष्टस्य तैर्नागरैः।*
*निर्व्याजीकृतचित्सुधारसमुदा निद्रायमाणस्य मे*
*निःशङ्कः करटः कदा करपुटीभिक्षां विलुण्ठिष्यति।।'*

पुष्टिस्तु महाभारतादौ द्रष्टव्या।

**निरहंकाररूपत्वाद्दयावीरादिरेष नो।। २४९।।**

दयावीरादौ हि नागानन्दादौ जीमूतवाहनादेरन्तरा मलयवत्याद्यनुरागादेरन्ते च विद्याधरचक्रवर्तित्वाद्याप्तेर्दर्शनादहंकारोपशमो न दृश्यते। शान्तस्तु सर्वाकारेणाहंकार-प्रशमैकरूपत्वान्न तत्रान्तर्भावमर्हति। अतश्च नागानन्दादेः शान्तरसप्रधानत्वमपास्तम्। ननु

*'न यत्र दुःखं न सुखं न चिन्ता न द्वेषरागौ न च काचिदिच्छा।*
*रसः स शान्तः कथितो मुनीन्द्रैः सर्वेषु भावेषु शमप्रधानः।।'*

NOTES

इत्येवंरूपस्य शान्तस्य मोक्षावस्थायामेवात्मस्वरूपापत्तिलक्षायां प्रादुर्भावात्तत्र संचार्यादीनामभावात्कथं रसत्वमित्युच्यते–

**युक्तवियुक्तदशायामवस्थितो यः शमः स एव यतः।**
**रसतामेति तदस्मिन्संचार्यादेः स्थितिश्च न विरुद्धा।। २५०।।**

यश्चास्मिन्सुखाभावोऽप्युक्तस्तस्य वैषयिकसुखपरत्वान्न विरोधः।

उक्तं हि–

*'यञ्च कामसुखं लोके यञ्च दिव्यं महत्सुखम्।*
*तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्।।'*
*सर्वाकारमहंकाररहितत्वं व्रजन्ति चेत्।*
*अत्रान्तर्भावमर्हन्ति दयावीरादयस्तथा।।'*

आदिशब्दाद्धर्मवीरदानवीरदेवताविषयरतिप्रभृतयः। तत्र देवताविषया रतिर्यथा–

*'कदा वाराणस्यामिह सुरधुनीरोधसि वसन्*
*वसानः कौपीनं शिरसि निदधानोऽञ्जलिपुटम्।*
*अये गौरीनाथ, त्रिपुरहर, शंभो, त्रिनयन,*
*प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्।।'*

अथ मुनीन्द्रसंमतो वत्सलः–

**स्फुटं चमत्कारितया वत्सलं च रसं विदुः।**
**स्थायी वत्सलतास्नेहः पुत्राद्यालम्बनं मतम्।। २५१।।**

**उद्दीपनानि तञ्चेष्टा विद्याशौर्यदयादयः।**
**आलिंगनांगसंस्पर्शशिरश्चुम्बनमीक्षणम्।। २५२।।**

**पुलकानन्दबाष्पाद्या अनुभावाः प्रकीर्तिताः।**
**संचारिणोऽनिष्टशङ्काहर्षगर्वादयो मताः।। २५३।।**

**पद्मगर्भच्छविर्वर्णो दैवतं लोकमातरः।**

यथा–

*'यदाह धात्र्या प्रथमोदितं वचो ययौ तदीयामवलम्ब्य चांगुलिम्।*
*अभूञ्च नम्रः प्रणिपातशिक्षया पितुर्मुदं तेन ततान सोऽर्भकः।।'*

NOTES

एतेषां च रसानां परस्परविरोधमाह–

**आद्यः करुणबीभत्सरौद्रवीरभयानकैः॥ २५४॥**

**भयानकेन करुणेनापि हास्यो विरोधभाक्।**
**करुणो हास्यशृंगाररसाभ्यामपि तादृशः॥ २५५॥**

**रौद्रस्तु हास्यशृंगारभयानकरसैरपि।**
**भयानकेन शान्तेन तथा वीररसः स्मृतः॥ २५६॥**

**शृंगारवीररौद्राख्यहास्यशान्तैर्भयानकः।**
**शान्तस्तु वीरशृंगाररौद्रहास्यभयानकैः॥ २५७॥**

**शृंगारेण तु बीभत्स इत्याख्याता विरोधिता।**

आद्यः शृङ्गारः। एषां च समावेशप्रकारा वक्ष्यन्ते।

**कुतोऽपि कारणात्क्वापि स्थिरतामुपयन्नपि॥ २५८॥**

**उन्मादादिर्न तु स्थायी न पात्रे स्थैर्यमेति यत्॥**

यथा विक्रमोर्वश्यां चतुर्थेऽङ्के पुरूरवस उन्मादः।

**रसभावौ तदाभासौ भावस्य प्रशमोदयौ॥ २५९॥**

**सन्धिः शबलता चेति सर्वेऽपि रसनाद्रसाः।**

रसनधर्मयोगित्वाद्भावादिष्वपि रसत्वमुपचारादित्यभिप्रायः। भावादय उच्यन्ते–

**सञ्चारिणः प्रधानानि देवादिविषया रतिः॥ २६०॥**

**उद्बुद्धमात्रः स्यायी च भाव इत्यभिधीयते।**

'न भावहीनोऽस्ति रसो न भावो रसवर्जितः। परस्परकृता सिद्धिरनयो रसभावयोः॥'

इत्युक्तदिशा परमालोचनया परमविश्रान्तिस्थानेन रसेन सहैव वर्तमाना अपि राजानुगतविवाहप्रवृत्तभृत्यवदापाततो यत्र प्राधान्येनाभिव्यक्ता व्यभिचारिणो, देवमुनिगुरुनृपादिविषया च रतिरुद्बुद्धमात्रा, विभावादिभिरपरिपुष्टतया रसरूपता-मनापद्यमानाश्च स्थायिनो भावा भावशब्दवाच्याः। तत्र व्यभिचारी यथा–'एवंवादिनि देवर्षौ–' इत्यादि। अत्रावहित्था।

NOTES

देवविषया रतिर्यथा मुकुन्दमालायाम्—

*'दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक, प्रकामम्।
अवधीरितशारदारविन्दौ चरणौ ते मरणेऽपि चिन्तयामि।।'*

मुनिविषया रतिर्यथा—

*'विलोकनेनैव तवामुना मुने, कृतः कृतार्थोऽस्मि निबर्हितांहसा।
तथापि शुश्रूषुरहं गरीयसीर्गिरोऽथवा श्रेयसि केन तृप्यते।।'*

राजविषया रतिर्यथा मम—

त्वद्वाजिराजिनिर्धूतधूलीपटलपङ्किलाम्। न धत्ते शिरसा गङ्गां भूरिभारभिया हरः।। एवमन्यत्। उद्बुद्धमात्रः स्थायिभावो यथा—

*'हरस्तु किंचित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि।।'*

अत्र पार्वतीविषया भगवतो रतिः।

ननूक्तं प्रपानकरसवद्विभावादीनामेकोऽत्राभासो रस इति तत्र संचारिणः पार्थक्याभावात्कथं प्राधान्येनाभिव्यक्तिरित्युच्यते—

**यथा मरिचखण्डादेरेकीभावे प्रपानके।। २६१।।**

**उद्रेकः कस्यचित्क्वापि तथा संचारिणो रसे।**

अथ रसाभासभावाभासौ—

**अनौचित्यप्रवृत्तत्व आभासो रसभावयोः।। २६२।।**

अनौचित्यं चात्र रसानां भरतादिप्रणीतलक्षणानां सामग्रीरहितत्वे सत्येकदेशयोगित्वोपल क्षणपरं बोध्यम्। तञ्च बालव्युत्पत्तये एकदेशतो दर्श्यते—

**उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च।
बहुनायकविषयायां रतौ तथानुभयनिष्ठायाम्।। २६३।।**

**प्रतिनायकनिष्ठत्वे तद्वदधमपात्रतिर्यगादिगते।
शृङ्गारेऽनौचित्यं रौद्रे गुर्वादिगतकोपे।। २६४।।**

**शान्ते च हीननिष्ठे गुर्वाद्यालम्बने हास्ये।
ब्रह्मवधाद्युत्साहेऽधमपात्रगते तथा वीरे।। २६५।।**

NOTES

**उत्तमपात्रगतत्वे भयानके ज्ञेयमेवमन्यत्र।**

तत्र रतेरुपनायकनिष्ठत्वे यथा मम–

*'स्वामी मुग्धतरो, वनं घनमिदं, बालाहमेकाकिनी,*
*क्षोणीमावृगुते तमालमलिनच्छाया तमःसंततिः।*
*तन्मे सुन्दर! मुञ्च कृष्ण, सहसा वर्त्मेति गोप्या गिरः*
*श्रुत्वा तां परिरभ्य मन्मथकलासक्तो हरिः पातु वः।।'*

बहुनायकनिष्ठत्वे यथा–

'कान्तास्त एव भुवनत्रितयेऽपि मन्ये येषां कृते सुतनु पाण्डुरयं कपोलः।' अनुभयनिष्ठत्वे यथा–मालतीमाधवे नन्दनस्य मालत्याम्।

'पश्चादुभयनिष्ठत्वेऽपि प्रथममेकनिष्ठत्वे रतेराभासत्वम्' इति श्रीमल्लोचन-कारा:। तत्रोदाहरणं यथा–

*रत्नावल्यां सागरिकाया अन्योन्यसंदर्शनात्प्राग्वत्सराजे रतिः।*
*प्रतिनायकनिष्ठत्वे यथा–ह्यग्रीववधे ह्यग्रीवस्य जलक्रीडावर्णने।*

अधमपात्रगतत्वे यथा–

*'जघनस्थलनद्धपत्रवल्ली गिरीमल्लीकुसुमानि कापि भिल्ली।*
*अवचित्य गिरौ पुरो निषण्णा स्वकचानुत्कचयाञ्चकार भर्त्रा।।'*

तिर्यग्गतत्वे यथा–

*'मल्लीमतल्लीषु वनान्तरेषु वल्ल्यन्तरे वल्लभमाह्वयन्ती।*
*चञ्चद्विपञ्चीकलनादभङ्गीसंगीतमङ्गीकुरुते स्म भृङ्गी।।'*

आदिशब्दात्तापसादयः। रौद्रभासो यथा–

*'रक्तोत्फुल्लविशाललोलनयनः कम्पोत्तराङ्गो मुहु-*
*र्मुक्त्वा कर्णमपेतभीर्धृतधनुर्बाणो हरेः पश्यतः।*
*आध्मातः कटुकोक्तिभिः स्वमसकृद्दोर्विक्रमं कीर्तय-*
*न्नंसास्फोटपटुर्युधिष्ठिरमसौ हन्तुं प्रविष्टोऽर्जुनः।।'*

भयानकाभासो यथा–

*'अशक्नुवन्सोढुमधीरलोचनः सहस्त्ररश्मेरिव यस्य दर्शनम्।*
*प्रविश्य हेमाद्रिगुहागृहान्तरं निनाय बिभ्यद्दिवसानि कौशिकः।।'*

NOTES

स्त्रीनीचविषयमेव हि भयं रसप्रकृतिः। एवमन्यत्र।

**भावाभासो लज्जादिके तु वेश्यादिविषये स्यात्॥ २६६॥**

स्पष्टम्।

**भावस्य शान्तावुदये सन्धिमिश्रितयोः क्रमात्।**
**भावस्य शान्तिरुदयः सन्धिः शबलता मता॥ २६७॥**

क्रमेण यथा–

'सुतनु जहिहि कोपं, पश्य पादानतं मां, न खलु तव कदाचित्कोप एवंविधोऽभूत्।

इति निगदति नाथे तिर्यगामीलिताक्ष्या नयनजलमनल्पं मुक्तमुक्तं न किंचित्॥' अत्र बाष्पमोचनेनेर्ष्याख्यसंचारिभावस्य शमः।

'चरणापतनप्रत्याख्यानात्प्रसादपराङ्मुखे निभृतकितवाचारेत्युक्त्वा रुषा परुषीकृते।

व्रजति रमणे निःश्वस्योच्चैः स्तनस्थितहस्तया नयनसलिलच्छन्ना दृष्टिः सखीषु निवेशिता॥'

अत्र विषादस्योदयः।

*'नयनयुगासेचनकं मानसवृत्त्यापि दुष्प्रापम्।*
*रूपमिदं मदिराक्ष्या मदयति हृदयं दुनोति च मे॥'*

अत्र हर्षविषादयोः सन्धिः।

*'क्वाकार्यं, शशलक्ष्मणः क्व च कुलं, भूयोऽपि दृश्येत सा,*
*दोषाणां प्रशमाय नः श्रुतमहो कोपेऽपि कान्तं मुखम्।*
*किं वक्ष्यन्त्यपकल्मषाः कृतधियः, स्वप्नेऽपि सा दुर्लभा,*
*चेतः स्वास्थ्यमुपैहि, कः खलु युवा धन्योऽधरं पास्यति॥'*

अत्र वितर्कौत्सुक्यमतिस्मरणशङ्कादैन्यधृतिचिन्तानां शबलता।

इति साहित्यदर्पणे रसादिनिरूपणो नाम तृतीयः परिच्छेदः।

# UNIT–IV

# इकाई–चतुर्थ

# प्रथम उद्योत

### ध्वन्यालोकः

**सोऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः॥ ८॥**

**व्यङ्ग्योऽर्थस्तद्व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन, च शब्दमात्रम्। तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ।**

### लोचनम्

**'काव्यं तु जातु जायेत कस्यचित्प्रतिभावतः।'**

इति नयेन यद्यपि स्वयमस्यैतत्परिस्फुरति, तथापीदमित्थमिति विशेषतो निरूप्यमाणं सहस्रशाखीभवति। यतोक्तमस्मत्परमगुरुभिः श्रीमदुत्पलपादैः–

**तैस्तैरप्युपयाचितैरुपनतस्तन्व्याः स्थितोऽप्यन्तिके**
**कान्तो लोकसमान एवमपरिज्ञातो न रन्तुं यथा।**
**लोकस्यैष तथानवेक्षितगुणः स्वात्मापि विश्वेश्वरो**
**नैवालं निजवैभवाय तदियं तत्प्रत्यभिज्ञोदिता॥ इति॥**

तेन ज्ञातस्यापि विशेषतो निरूपणमनुसन्धानात्मकमत्र प्रत्यभिज्ञानं, न तु तदेवेदमित्येतावन्मात्रम्। *महाकवेरिति।* यो महाकविरहं भूयासमित्याशास्ते।

### ध्वन्यालोकः

व्यङ्ग्यव्यञ्जकाभ्यामेव सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनां, न वाच्यवाचकरचनामात्रेण।

NOTES

इदानीं व्यङ्ग्यव्यञ्जकयोः प्राधान्येऽपि यद्वाच्यवाचकावेव प्रथममुपाददते कवयस्तदपि युक्तमेवेत्याह–

**आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः।**
**तदुपायतया तद्वदर्थे वाच्ये तदादृतः।। ९।।**

## लोचनम्

एवं व्यङ्ग्यस्यार्थस्य व्यञ्जकस्य शब्दस्य च प्राधान्यं वदता व्यङ्ग्यव्यञ्जकभावस्यापि प्राधान्यमुक्तमिति ध्वनति ध्वन्यते, ध्वननमिति त्रितयमप्युपपन्नमित्युक्तम्।। ८।।

ननु प्रथमोपादीयमानत्वाद्वाच्यवाचकतद्भावस्यैव प्राधान्यमित्याशङ्क्योपा-यानामेव प्रथममुपादानं भवतीत्यभिप्रायेण विरुद्धोऽयं प्राधान्ये साध्ये

## ध्वन्यालोकः

यथा ह्यालोकार्थी सन्नपि दीपशिखायां यत्नवाञ्जनो भवति तदुपायतया। न हि दीपशिखामन्तरेणालोकः सम्भवति। तद्वद्व्यङ्ग्यमर्थं प्रत्यादृतो जनो वाच्येऽर्थे यत्नवान् भवति। अनेन प्रतिपादकस्य कवेर्व्यङ्ग्यमर्थं प्रति व्यापारो दर्शितः।। ९।।

प्रतिपाद्यस्यापि तं दर्शयितुमाह–

**यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते।**
**वाच्यार्थपूर्विका तद्वत्प्रतिपत्तस्य वस्तुनः।। १०।।**

## लोचनम्

हेतुरिति दर्शयति–*इदानीमित्यादिना* । आलोकनमालोकः; वनितावदनारविन्दा-दिविलोकनमित्यर्थः। तत्र चोपायो दीपशिखा।। ९।।

प्रतिपदिति भावे क्विप्। 'तस्य वस्तुन' इति व्यङ्ग्यरूपस्य सारस्येत्यर्थः। अनेन श्लोकेनात्यन्तसहृदयो यो न भवति तस्यैष स्फुटसंवेद्य एव क्रमः। यथात्यन्तशब्दवृत्तज्ञो यो न भवति तस्य पदार्थवाक्यार्थक्रमः।

## ध्वन्यालोकः

यथा हि पदार्थद्वारेण वाक्यार्थावगमस्तथा वाच्यार्थप्रतीतिपूर्विका व्यङ्ग्यस्यार्थस्य प्रतिपत्तिः।। १०।।

इदानीं वाच्यार्थप्रतीतिपूर्वकत्वेऽपि तत्प्रतीतेर्व्यङ्ग्यस्यार्थस्य प्राधान्यं यथा न व्यालुप्यते तथा दर्शयति–

**स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन्।**
**यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते॥ ११॥**

## लोचनम्

काष्ठाप्राप्तसहृदयभावस्य तु वाक्यवृत्तकुशलस्येव सन्नपि क्रमोऽभ्यस्तानुमाना-विनाभावस्मृत्यादिवदसंवेद्य इति दर्शितम्॥ १०॥

*न व्यालुप्यत* इति। प्राधान्यादेव तत्पर्यन्तानुसरणरणरणकत्वरिता मध्ये विश्रान्तिं न कुर्वत इति क्रमस्य सतोऽप्यलक्षणं प्राधान्ये हेतुः। स्वसामर्थ्यमाकाङ्क्षा-योग्यतासन्निधयः। *विभाव्यत* इति। विशब्देन विभक्ततोक्ता;

## ध्वन्यालोकः

यथा स्वसामर्थ्यवशेनैव वाक्यार्थं प्रकाशयन्नपि पदार्थो व्यापारनिष्पत्तौ न भाव्यते विभक्ततया॥ ११॥

**तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम्।**
**बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते॥ १२॥**

## लोचनम्

विभक्ततया न भाव्यत इत्यर्थः। अनेन विद्यमान एव क्रमो न संवेद्यत इत्युक्तम्। तेन यत्स्फोटाभिप्रायेणासन्नेव क्रम इति व्याचक्षते तत्प्रत्युत विरुद्धमेव। वाच्येऽर्थे विमुखो विश्रान्तिनिबन्धनं परितोषमलभमान आत्मा हृदयं येषामित्यनेन सचेतसामित्यस्यैवार्थोऽभिव्यक्तः। सहृदयानामेव तर्ह्ययं महिमास्तु, न तु काव्यस्यासौ कश्चिदतिशय इत्याशङ्क्याह–अवभासत इति। तेनात्र विभक्ततया न भासते, न तु वाच्यस्य सर्वथैवानवभासः। अत एव तृतीयोद्योते घटप्रदीपदृष्टान्त-बलाद्व्यङ्ग्यप्रतीतिकालेऽपि वाच्यप्रतीतिर्न विघटत इति यद्वक्ष्यति तेन सहास्य ग्रन्थस्य न विरोधः॥ ११-१२॥

## ध्वन्यालोकः

एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्यार्थस्य सद्भावं प्रतिपाद्य प्रकृत उपयोजयन्नाह–

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तःकाव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥ १३॥**

NOTES

## लोचनम्

*सद्भावमिति* । सत्तां साधुभावं प्राधान्यं चेत्यर्थः। द्वयं हि प्रतिपापादयिषितम्। प्रकृत इति लक्षणे। *उपयोजयन्* उपयोगं गमयन्। तमर्थमिति चायमुपयोगः। स्वशब्द आत्मवाची। स्वश्चार्थश्च तौ स्वार्थौ; तौ गुणीकृतौ याभ्याम्, यथासंख्येन तेनार्थो गुणीकृतात्मा, शब्दो गुणीकृताभिधेयः *तमर्थमिति।* 'सरस्वती स्वादु तदर्थवस्तु' इति यदुक्तम्। *व्यङ्क्तः द्योतयतः*। व्यङ्क्त इति द्विवचनेनेदमाह– यद्यप्यविवक्षितवाच्ये शब्द एव व्यञ्जकस्तथाप्यर्थस्यापि सहकारिता न त्रुट्यति, अन्यथा अज्ञातार्थोऽपि शब्दस्तद्व्यञ्जकः स्यात्। विक्षितान्यपरवाच्ये च शब्दस्यापि सहकारित्वं भवत्येव, विशिष्टशब्दाभिधेयतया विना तस्यार्थस्याव्यञ्जकत्वादिति सर्वत्र शब्दार्थयोरुभयोरपि ध्वननं व्यापारः। तेन यद्भट्टनायकेन द्विवचनं दूषितं तद् गजनिमीलिकयैव। अर्थः शब्दो वेति तु विकल्पाभिधानं प्राधान्याभिप्रायेण।

## ध्वन्यालोकः

यत्रार्थो वाच्यविशेषः वाचकविशेषः शब्दो वा तमर्थं व्यङ्क्तः, स काव्यविशेषो ध्वनिरिति।

अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमादिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम्। यदप्युक्तम्–

## लोचनम्

काव्यं च तद्विशेषश्चासौ काव्यस्य वा विशेषः। काव्यग्रहणाद् गुणालङ्कारोपस्कृतशब्दार्थपृष्ठपाती ध्वनिलक्षण 'आत्मे'त्युक्तम्। तेनैतन्निरवकाशं श्रुतार्थापत्तावपि ध्वनिव्यवहारः स्यादिति। यच्चोक्तम्–'चारुत्वप्रतीतिस्तर्हि काव्यस्यात्मा स्यात्' इति तदङ्गीकुर्म एव। नम्नि खल्वयं विवाद इति। यच्चोक्तम्–'चारुणः प्रतीतिर्यदि काव्यात्मा प्रत्यक्षादिप्रमाणादपि सा भवन्ती तथा स्यात्' इति। तत्र शब्दार्थमयकाव्यात्माभिधानप्रस्तावे क एष प्रसङ्ग इति न किञ्चिदेतत्। स इति। अर्थो वा शब्दो वा, व्यापारो वा। अर्थोऽपि वाच्यो वा ध्वनतीति, शब्दोऽप्येवम्। व्यङ्ग्यो वा ध्वन्यत इति व्यापारो वा शब्दार्थयोर्ध्वननमिति।

## ध्वन्यालोकः

'प्रसिद्धप्रस्थानातिक्रमिणो मार्गस्य काव्यहानेर्ध्वनिर्नास्ति' इति, तदप्ययुक्तम्। यतो लक्षणकृतामेव स केवलं न प्रसिद्धः, लक्ष्ये तु परीक्ष्यमाणे स एव सहृदयहृदयाह्लादकारि काव्यतत्त्वम्। ततोऽन्यच्चित्रमेवेत्यग्रे दर्शयिष्यामः।

## लोचनम्

कारिकया तु प्राधान्येन समुदाय एव काव्यरूपो मुख्यतया ध्वनिरिति प्रतिपादितम्। *विभक्त* इति। गुणालङ्काराणां वाच्यवाचकभावप्राणत्वात्। अस्य च तदन्यव्यङ्ग्यव्यञ्जकभावसारत्वान्नास्य तेष्वन्तर्भाव इति। अनन्यत्र भावो विषयशब्दार्थः। एवं तद्व्यतिरिक्तः कोऽयं ध्वनिरित निराकृतम्। लक्षणकृतामेवेति। लक्षणकाराप्रसिद्धता विरुद्धो हेतुः, तत एव हि यत्नेन लक्षणीयता। लक्ष्ये त्वप्रसिद्धत्वमसिद्धो हेतुः। यच्च नृत्तगीतादिकल्पं,

## ध्वन्यालोकः

यदप्युक्तम्–'कामनीयकमनतिवर्तमानस्य तस्योक्तालङ्कारादिप्रकारेष्वन्तर्भावः' इति तदप्यसमीचीनम्; वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्यव्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः, वाच्यवाचकचारुत्वहेतवो हि तस्याङ्गभूताः, स त्वङ्गिरूप एवेति प्रतिपादयिष्यमाणत्वात्।

## लोचनम्

तत्काव्यस्य न किञ्चित्। *चित्रमिति*। विस्मयकृद्वृत्त्यादिवशात्, न तु सहृदयाभिलषणीयचमत्कारसाररसनिःष्यन्दमयमित्यर्थः। काव्यानुकारित्वाद्वा चित्रम्, आलेखमात्रत्वाद्वा, कलामात्रत्वाद्वा। *अग्र* इति।

**प्रधादनगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थितम्।**
**द्विधा काव्यं ततोऽन्यद्यत्तच्चित्रमभिधीयते॥**

**परिकरश्लोकश्चात्र–**

**व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः।**
**वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः॥**

ननु यत्र प्रतीयमानस्यार्थस्य वैशद्येनाप्रतीतिः स नाम मा भूद् ध्वनेर्विषयः। यत्र तु प्रतीतिरस्ति, यथा–समासोत्तयाक्षेपानुक्तनिमित्तविशेषोक्तिपर्यायोक्तापह्नुतिदीपक-सङ्करालङ्कारादौ, तत्र ध्वनेरन्तर्भावो भविष्यतीत्यादि निराकर्तुमभिहितम्–'उपसर्ज्जनीकृतस्वार्थौ' इति।

## लोचनम्

इति तृतीयोद्योते वक्ष्यति। परिकरार्थं कारिकार्थस्याधिकावापं कर्तुं श्लोकः *परिकरश्लोकः*। यत्रेत्यलङ्कारे। *वैशद्येनेति।* चारुतया स्फुटतया चेत्यर्थः।

NOTES

*अभिहितमिति*। भूतप्रयोग आदौ व्यङ्क्त इत्यस्य व्याख्यातत्वात्। *गुणीकृतात्मेति*। आत्मेत्यनेन स्वशब्दस्यार्थो व्याख्यातः। न *चैतदिति*। व्यङ्ग्यस्य प्राधान्यम्। प्राधान्यं च यद्यपि ज्ञप्तौ न चकास्ति; 'बुद्धौ

## ध्वन्यालोकः

अर्थो गुणीकृतात्मा, गुणीकृताभिधेयः शब्दो वा यत्रार्थान्तरमभिव्यनक्ति स ध्वनिरिति। तेषु कथं तस्यान्तर्भावः व्यङ्ग्यप्राधान्ये हि ध्वनिः। न चैतत्समासोत्तयादिष्वस्ति।

समासौक्तौ तावत्–

**उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम्।**
**यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं न लक्षितम्॥**

## लोचनम्

तत्त्वावभासिन्याम्' इति नयेनाखण्डचर्वणाविश्रान्तेः, तथापि विवेचकैर्जीवितान्वेषणे क्रियमाणे यदा व्यङ्ग्योऽर्थः पुनरपि वाच्यमेवानुप्राणयन्नास्ते तदा तदुपकरणत्वादेव तस्यालङ्कारता। ततो वाच्यादेव तदुपस्कृताच्चमत्कारलाभ इति। यद्यपि पर्यन्ते रसध्वनिरस्ति, तथापि मध्यकक्षानिविष्टोऽसौ व्यङ्ग्योऽर्थो न रसोन्मुखीभवति स्वातन्त्र्येण, अपि तु वाच्यमेवार्थं संस्कर्तुं धावतीति गुणीभूतव्यङ्ग्यतोक्ता। *समासोक्ताविति*।

## ध्वन्यालोकः

इत्यादौ व्यङ्ग्येनागतं वाच्यमेव प्राधान्येन प्रतीयते समारोपितनायिकानायकव्यवहारयोर्निशाशशिनोरेव वाक्यार्थत्वात्।

## लोचनम्

**यत्रोक्तौ गम्यतेऽन्योऽर्थस्तत्समानैर्विशेषणैः।**
**सा समासोक्तिरुदिता संक्षिप्तार्थतया बुधैः॥**

इत्यत्र समासोक्तेर्लक्षणस्वरूपं हेतुर्नाम तन्निर्वचनमिति पादचतुष्टयेन क्रमादुक्तम्। *उपोढो रागः* सान्ध्योऽरुणिमा प्रेम च येन। *विलोलास्तारका* ज्योतींषि नेत्रत्रिभागाश्च यत्र। *तथेति*। झटित्येव प्रेमरभसेन च। *गृहीतमाभासितं* परिचुम्बितुमाक्रान्तं च। *निशाया मुखं* प्रारम्भो वदनकोकनदं चेति। *यथेति*। झटिति ग्रहणेन प्रेमरभसेन च। *तिमिरं चांशुकाश्च* सूक्ष्मांशवस्तिमिरांशुकं

NOTES

रश्मिशबलीकृतं तमःपटलं, तिमिरांशुकं नीलजालिका नवोढाप्रौढवधूचिता। रागाद्रक्तत्वात् सन्ध्याकृतादनन्तरं प्रेमरूपाच्च हेतोः। *पुरोऽपि* पूर्वस्यां दिशि अग्रे च। *गलितं* प्रशान्तं पतितं च। रात्र्या करणभूतया समस्तं मिश्रितम्; उपलक्षणत्वेन वा। न *लक्षितं*

## ध्वन्यालोकः

आक्षेपेऽपि व्यङ्ग्यविशेषाक्षेपिणोऽपि वाच्यस्यैव चारुत्वं प्राधान्येन वाक्यार्थ आक्षेपोक्तिसामर्थ्यादेव ज्ञायते। तथाहि—तत्र शब्दोपारूढो विशेषाभिधानेच्छया प्रतिषेधरूपो य आक्षेपः स एव व्यङ्ग्यविशेषमाक्षिपन्मुख्यं काव्यशरीरम्।

## लोचनम्

रात्रिप्रारम्भोऽसाविति न ज्ञातं, तिमिरसंवलितांशुदर्शने हि रात्रिमुखमिति लोकेन लक्ष्यते न तु स्फुट आलोके। नायिकापक्षे तु तयेति कर्तृपदम्। रात्रिपक्षे तु अपिशब्दो लक्षितमित्यस्यानन्तरः। अत्र च नायकेन पश्चाद्रतेन चुम्बनोपक्रमे पुरो नीलांशुकस्य गलनं पतनम्। यदि वा 'पुरोऽग्रे नायकेन तथा गृहीतं मुखमि'ति सम्बन्धः। तेनात्र व्यङ्ग्ये प्रतीतेऽपि न प्राधान्यम्। तथाहि नायकव्यवहारो निशाशशिनावेव शृङ्गारविभावरूपौ संस्कुर्वाणोऽलङ्कारतां भजते, ततस्तु वाच्याद्वि-भावीभूताद्रसनिःष्यन्दः। यस्तु व्याचष्टे—'तया निशयेति कर्तृपदं, न चाचेतनायाः कर्तृत्वमुपन्नमिति

## लोचनम्

शब्देनैवात्र नायकव्यवहार उन्नीतोऽभिधेय एव, न व्यङ्ग्य इत्यत एव समासोक्तिः' इति। स प्रकृतमेव ग्रन्थार्थमत्यजद्व्यङ्ग्येनानुगतमिति। एकदेशविवर्ति चेत्थं रूपकं स्यात्, 'राजहंसैरवीज्यन्त शरदैव सरोनृपाः' इतिवत्, न तु समासोक्तिः, तुल्यविशेषणाभावात्। गम्यत इति चानेनाभिधाव्यापारनिरासादित्य-लमवान्तरेण बहुना। नायिकाया नायके यो व्यवहारः स निशायां समारोपितः; नायिकायां नायकस्य यो व्यवहारः स शशिनि समारोपित इति व्याख्याने नैकशेषप्रसङ्गः। *आक्षेप* इति।

**प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया।**
**वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः॥**

NOTES

तत्राद्यौ यथा–

**अहं त्वां यदि नेक्षेय क्षणमप्युत्सुका ततः।**
**इयदेवास्त्वतोऽन्येन किमुक्तेनाप्रियेण ते॥**

## लोचनम्

इति वक्ष्यमाणमरणविषयो निषेधात्माक्षेपः। तत्रेयदस्त्वित्येतदेवात्र म्रिये इत्याक्षिपत्सच्चारुत्वनिबन्धनमित्याक्षेप्येणाक्षेपकमलङ्कृतं सत्प्रधानम्। उक्तविषयस्तु यथा ममैव–

**भो भोः किं किमकाण्ड एव पतितस्त्वं पान्थ कान्या गति-**
**स्तत्तादृक्तृषितस्य मे खलमतिः सोऽयं जलं गूहते।**
**अस्थानोपनतामकालसुलभां तृष्णां प्रति क्रुध्य भो-**
**स्त्रैलोक्यप्रथितप्रभावमहिमा मार्गः पुनर्मारवः॥**

**अत्र कश्चित्सेवकःप्राप्तः प्राप्तव्यमस्मात्किमिति न लभ इति प्रत्यशाविशस्यमानहृदयः केनचिदमुनाक्षेपेण प्रतिबोध्यते। तत्राक्षेपेण निषेधरूपेण वाच्यस्यैवासत्पुरुषसेवातद्वैफल्यतत्कृतोद्वेगात्मनः शान्तरसस्थायि-भूतनिर्वेदविभावरूपतया चमत्कृतिदायित्वम्। वामनस्य तु 'उपमानाक्षेपः' इत्याक्षेपलक्षणम्। उपमानस्य चन्द्रादेराक्षेपः, अस्मिन्सति किं त्वया कृत्यमिति। यथा–**

**तस्यास्तन्मुखमस्ति सौम्यसुभगं किं पार्वणेनेन्दुना**
**सौन्दर्यस्य पदं दृशौ यदि च तैः किं नाम नीलोत्पलैः।**
**किं वा कोमलकान्तिभिः किसलयैः सत्येव तत्राधरे**
**ही धातुः पुनरुक्तवस्तुरचनारम्भेष्वपूर्वो ग्रहः॥**

## ध्वन्यालोकः

**चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा।**

यथा–

**अनुरागवती सन्ध्या दिवसस्तत्पुरस्सरः।**
**अहो दैवगतिः कीदृक्तथापि न समागमः॥**

NOTES

## लोचनम्

अत्र व्यङ्ग्योऽप्युपमार्थो वाच्यस्यैवोपस्कुरुते। किं तेन कृत्यमिति त्वपहस्तनारूप आक्षेपो वाच्य एव चमत्कारकारणम्। यदि वोपमानस्याक्षेपः सामर्थ्यादाकर्षणम्। यथा–

**ऐन्द्रं धनुः पाण्डुपयोधरेण शरद्दधानार्द्रनखक्षताभम्।**
**प्रसादयन्ती सकलङ्कमिन्दुं तापं रवेरभ्यधिकं चकार॥**

इत्यत्रेर्ष्याकलुषितनायकान्तरमुपमानमाक्षिप्तमपि वाच्यार्थमेवालङ्करोतीत्येषा तु समासोक्तिरेव। तदाह–*चारुत्वोत्कर्षेति*। अत्रैव प्रसिद्धं

## ध्वन्यालोकः

अत्र सत्यामपि व्यङ्ग्यप्रतीतौ वाच्यस्यैव चारुत्वमुत्कर्षवदिति तस्यैव प्राधान्यविवक्षा।

## लोचनम्

दृष्टान्तमाह–*अनुरागवतीति*। तेनाक्षेपप्रमेयसमर्थनमेवापरिसमाप्तमिति मन्तव्यम्। तत्रोदाहरणत्वेन समासोक्तिश्लोकः पठितः अहो दैवगतिरिति। गुरुपारतन्त्र्यादिनिमित्तोऽसमागम इत्यर्थः। *तस्यैवेति*। वाच्यस्यैवेति यावत्। वामनाभिप्रायेणायमाक्षेपः, भामहाभिप्रायेण तु समासोक्तिरित्यमुमाशयं हृदये गृहीत्वा समासोक्त्याक्षेपयोः युक्त्येदमेकमेवोदाहरणं व्यतरद् ग्रन्थकृत्। एषापि समासोक्तिर्वाऽस्तु आक्षेपो वा, किमनेनास्माकम्। सर्वथालङ्कारेषु व्यङ्ग्यं वाच्ये गुणीभवतीति नः साध्यमित्यत्राशयोऽत्र ग्रन्थेऽस्मद्गुरुभिर्निरूपितः।

एवं प्राधान्यविवक्षायां दृष्टान्तमुक्त्वा व्यपदेशोऽपि प्राधान्यकृत एव भवतीत्यत्र दृष्टान्तं स्वपरप्रसिद्धमाह–*यथा चेति*। उपमाया *इति*। उपमानोपमेयभावस्येत्यर्थः तयेत्युपमया। दीपके हि 'आदिमध्यान्तविषयं त्रिधा दीपकमिष्यते' इति लक्षणम्।

## ध्वन्यालोकः

यथा च दीपकापह्नुत्यादौ व्यङ्ग्यत्वेनोपमायाः प्रतीतावपि प्राधान्येनाविवक्षितत्वान्न तया व्यपदेशस्तद्वदत्रापि द्रष्टव्यम्।

### लोचनम्

**मणिः शाणोल्लीढः समरविजयी हेतिदलितः**
**कलाशेषश्चन्द्रः सुरतमृदिता बालललना।**
**मदक्षीणो नागः शरदि सरिदाश्यानपुलिना**
**तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः॥**

इत्यत्र दीपनकृतमेव चारुत्वम्। 'अपह्नुतिरभीष्टस्य किञ्चिदन्तर्गतोपमा' इति। तत्रापह्नुत्यैव शोभा। यथा–

**नेयं विरौति भृङ्गाली मदेन मुखरा मुहुः।**
**अयमाकृष्यमाणस्य कन्दर्पधनुषो ध्वनिः॥ इति॥**

एवमाक्षेपं विचार्योद्देशक्रमेणैव प्रमेयान्तरमाह–*अनुक्तनिमित्तायामिति।*

### ध्वन्यालोकः

अनुक्तनिमित्तायामपि विशेषोक्तौ–

**आहूतोऽपि सहायैरोमित्युक्त्वा विमुक्तनिद्रोऽपि।**
**गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति॥**

### लोचनम्

**एकदेशस्य विगमे या गुणान्तरसंस्तुतिः।**
**विशेषप्रथनायासौ विशेषोक्तिरिति स्मृता॥**

यथा–

**स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।**
**हरतापि तनुं यस्य शम्भुना न हृतं बलम्॥**

इयं चाचिन्त्यनिमित्तेति नास्यां व्यङ्ग्यस्य सद्भावः। उक्तनिमित्तायामपि वस्तुस्वभावमात्रत्वे पर्यवसानमिति तत्रापि न व्यङ्ग्यसद्भावशङ्का। यथा–

**कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने।**
**नमोऽस्त्ववार्यवीर्याय तस्मै कुसुमधन्वने॥**

NOTES

**ध्वन्यालोकः**

इत्यादौ व्यङ्ग्यस्य प्रकरणसामर्थ्यात्प्रतीतिमात्रं न तु तत्प्रतीतिनिमित्ता काचिच्चारुत्वनिष्पत्तिरिति न प्राधान्यम्। पर्यायोक्तेऽपि यदि प्राधान्येन व्यङ्ग्यत्वं तद्भवतु नाम तस्य

**लोचनम्**

तेन प्रकारद्वयमवधीर्य तृतीयं प्रकारमाशङ्कते–*अनुक्तनिमित्तायामपीति*। *व्यङ्ग्यस्येति*। शीतकृता खल्वार्तिरत्र निमित्तमिति भट्टोद्भटः, तदभिप्रायेणाह–*न त्वत्र काचिञ्चारुत्वनिष्पत्तिरिति*। यत्तु रसिकैरपि निमित्तं कल्पितम्–'कान्तासमागमे गमनादपि लघुतरमुपायं स्वप्नं मन्यमानो निद्रागमबुद्ध्या सङ्कोचं नात्यजत्' इति तदपि निमित्तं चारुत्वहेतुतया नालङ्कारविद्भिः कल्पितम्, अपि तु विशेषोक्तिभाग एव'न शिथिलयतीत्येवम्भूतोऽभिव्यव्यज्यमाननिमित्तो-पस्कृतश्चारुत्वहेतुः। अन्यथा तु विशेषोक्तिरेवेयं न भवेत्। एवममिप्रायद्वयमपि साधारणोक्तया ग्रन्थकृन्न्यरूपयन्न त्वौद्भटेनैवाभिप्रायेण ग्रन्थो व्यवस्थित इति मन्तव्यम्। *पर्यायोक्तेऽपीति*–

ध्वनावन्तर्भावः। न तु ध्वनेस्तत्रान्तर्भावः। तस्य महाविषयत्वेनाङ्गित्वेन च प्रतिपादयिष्यमाणत्वात्। न पुनः पर्यायो भामहोदाहृतसदृशे व्यङ्ग्यस्यैव प्राधान्यम्। वाच्यस्य तत्रोपसर्जनाभावेनाविवक्षित्वात्।

**लोचनम्**

**पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।**
**वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना॥**

इति लक्षणम्। यथा–

**शत्रुच्छेददृढेच्छस्य मुनेरुत्पथगामिनः।**
**रामस्यानेन धनुषा देशिता धर्मदेशना॥ इति।**

अत्र भीष्मस्य भार्गवप्रभावाभिभावी प्रभाव इति यद्यपि प्रतीयते, तथापि तत्सहायेन देशिता धर्मदेशनेत्यभिधीयमानेनैव काव्यार्थोऽलङ्कृतः। अत एव पर्यायेण प्रकारान्तरेणावगमात्मना व्यङ्ग्येनोपलक्षितं सद्यदभिधीयते तदभिधीयमानमुक्तमेव सत्पर्यायोक्तमित्यभिधीयत इति लक्षणपदम्, पर्यायोक्तमिति लक्ष्यपदम्, अर्थालङ्कारत्वं सामान्यलक्षणं चेति सर्वं युज्यते। यदि त्वभिधीयत इत्यस्य बलाद् व्याख्यानमभिधीयते प्रतीयते प्रधानतयेति, उदाहरणं च 'भम

NOTES

धम्मिअ' इत्यादि, तदालङ्कारत्वमेव दूरे सम्पन्नमात्मतायां पर्यवसानात्। तदा चालङ्कारमध्ये गणना न कार्या।

## लोचनम्

भेदान्तराणि चास्य वक्तव्यानि। तदाह– *यदि प्राधान्येनेति। ध्वनाविति।* आत्मन्यन्तर्भावादात्मैवासौ नालङ्कारस्स्यादित्यर्थः। *तत्रेति*। यादृशोऽलङ्कारत्वेन विवक्षितस्तादृशे ध्वनिर्नान्तर्भवति, न तादृगस्माभिर्ध्वनिरुक्तः। ध्वनिर्हि महाविषयः सर्वत्र भावाद् व्यापकः समस्तप्रतिष्ठास्थानत्वाच्चाङ्गी। न चालङ्कारो व्यापकोऽन्यालङ्कारवत्। न चाङ्गी, अलङ्कार्यतन्त्रत्वात्। अथ व्यापकत्वाङ्गित्वे तस्योपगम्येते, त्यज्यते चालङ्कारता, तर्ह्यस्मन्नय एवायमवलम्ब्यते केवलं मात्सर्यग्रहात्पर्यायोक्तवाचेति भावः। न चेयदपि प्राक्तनैर्दृष्टमपि त्वस्माभिरेवोन्मी–लितमिति दर्शयति– *न पुनरिति*। भामहस्य तादृक्तदीयं रूपमभिमतं तादृगुदाहरणेन दर्शितम्। तत्रापि नैव व्यङ्ग्यस्य प्राधान्यं चारुत्वाहेतुत्वात्। तेन तदनुसारितया तत्सदृशं यदुदाहरणान्तरमपि कल्प्यते तत्र नैव व्यङ्ग्यस्य प्राधान्यमिति सङ्गतिः।

यदि तु तदुक्तमुदाहरणमनादृत्य 'भम धम्मिअ' इत्याद्युदाह्रियते, तदस्मच्छिष्यतैव। केवलं तु नयमनवलम्ब्यापश्रवणेनात्मसंस्कार

## ध्वन्यालोकः

अपह्नुतिदीपकयोः पुनर्वाच्यस्य प्राधान्यं व्यङ्ग्यस्य चानुयानित्वं प्रसिद्धमेव।

## लोचनम्

त्यिनार्यचेष्टितम्। यदाहुरैतिहासिकाः–'अवज्ञयाप्यवच्छाद्य शृण्वन्नरकमृच्छति' इति। भामहेन ह्युदाहृतम्–

**'गृहेष्वध्वसु वा नान्नं भुञ्ज्महे यदधीतिनः।**
**विप्रा न भुञ्जते' इति।**

एतद्धि भगवाद्वासुदेववचनं पर्यायेण रसदानं निषेधति। यत्स एवाह–'तच्च रसदाननिवृत्तये' इति। न चास्य रसदाननिषेधस्य व्यङ्ग्यस्य किञ्चिच्चारुत्वमस्ति येन प्राधान्यं शङ्क्येत। अपि तु तद्व्यङ्ग्योपोद्बलितं विप्रभोजनेन विना यन्न भोजनं तदेवोक्तप्रकारेण पर्यायोक्तं सत्प्राकरणिकं भोजनार्थमलङ्कुरुते। न हास्य निर्विषं भोजनं भवत्विति विवक्षितमिति पर्यायोक्तमलङ्कार एवेति चिरन्तनानामभिमत इति तात्पर्यम्।

*अपह्नुतिदीपकयोरिति*। एतत्पूर्वमेव निर्णीतम्। अत एवाह–

सङ्करालङ्कारेऽपि यदालङ्कारोऽलङ्कारान्तरच्छायामनुगृह्णाति, तदा व्यङ्ग्यस्य प्राधान्येनाविवक्षितत्वान्न ध्वनिविषयत्वम्।

## लोचनम्

*प्रसिद्धमिति*। प्रतीतं प्रसाधितं प्रामाणिकं चेत्यर्थः। पूर्वं चैतदुपमादिव्यपदेश–भाजनमेव तद्यथा न भवतीत्यमुया छायया दृष्टान्ततयोक्तमप्युद्देशक्रमपूरणाय ग्रन्थशय्यां योजयितुं पुनरप्युक्तं 'व्यङ्ग्यप्राधान्याभावान्न ध्वनिरि'ति छायान्तरेण वस्तु पुनरेकमेवोपमाया एव व्यङ्ग्यत्वेन ध्वनित्वाशङ्कनात्। यत्तु विवरणकृत्–दीपकस्य सर्वत्रोपमान्वयो नास्तीति बहुनोदाहरणप्रपञ्चेन विचारितवांस्तदनुपयोगि निस्सारं सुप्रतिक्षेपं च।

**मदो जनयति प्रीतिं सानङ्गं मानभञ्जनम्।**
**स प्रियासङ्गमोत्कण्ठां सासह्यां मनसः शुचम्।। इति।।**

अत्राप्युत्तरोत्तरजन्यत्वेऽप्युपमानोपमेयभावस्य सुकल्पत्वात्। न हि क्रमिकाणां नोपमानोपमेयभावः। तथा हि–

## लोचनम्

**राम इव दशरथोऽभूद्दशरथ इव रघुरजोऽपि रघुसदृशः।**
**अज इव दिलीपवंशश्चित्रं रामस्य कीर्तिरियम्।।**

इति न न भवति। तस्मात्क्रमिकत्वं समं वा प्राकरणिकत्वमुपमां निरुणद्धीति कोऽयं त्रास इत्यलं गर्दभीदोहानुवर्तनेन।

*सङ्करालङ्कारेऽपीति*।

**विरुद्धालङ्क्रियोल्लेखे समं तद्वृत्त्यसम्भवे।**
**एकस्य च ग्रहे न्यायदोषाभावे च सङ्करः।।**

इति लक्षणादेकः प्रकारः। यथा ममैव–

**शशिवदनाऽसितसरसिजनयना सितकुन्ददशनपङ्क्तिरियम्।**
**गगनजलस्थलसम्भवहृद्याकारा कृता विधिना।। इति।।**

अत्र शशी वदनमस्याः तद्वद्वा वदनमस्या इति रूपकोपमोल्लेखाद्युगपद् द्वयासम्भवादेकतरपक्षत्यागग्रहणे प्रमाणाभावात्सङ्कर इति व्यङ्ग्यवाच्यताया एवानिश्चयात्का ध्वनिसम्भावना। योऽपि द्वितीयः प्रकारः–शब्दार्थालङ्काराणामेकत्रभाव

NOTES

इति तत्रापि प्रतीयमानस्य का शङ्का। यथा—'स्मर स्मरमिव प्रियं रमयसे यमालिङ्गनात्' इति। अत्रैव यमकमुपमा च। तृतीयः प्रकारः—यत्रैकत्र वाक्यांशेऽनेकोऽर्थालङ्कारस्तत्रापि द्वयोः साम्यात् कस्य व्यङ्ग्यता। यथा—

## लोचनम्

**तुल्योदयावसानत्वाद्गतेऽस्तं प्रति भास्वति।**
**वासाय वासरः क्लान्तो विशतीव तमोगुहाम्।। इति।।**

अत्र हि स्वामिविपत्तिसमुचितव्रतग्रहणहेवाकिकुलपुत्रकरूपणमेकदेश-विवर्त्तिरूपकं दर्शयति। उत्प्रेक्षा चेवशब्देनोक्ता। तदिदं प्रकारद्वयमुक्तम्।

**शब्दार्थवर्त्त्यलङ्कारा वाक्य एकत्र वर्त्तिनः।**
**सङ्करश्चैकवाक्यांशप्रवेशाद्वाऽभिधीयते।। इति च।।**

चतुर्थस्तु प्रकारो यत्रानुग्राह्यानुग्राहकभावोऽलङ्काराणाम्। यथा—

**प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या।**
**तया गृहीतं नु मृगाङ्गनाभ्यस्ततो गृहीतं नु मृगाङ्गनाभिः।।**

## ध्वन्यालोकः

अलङ्कारद्वयसम्भावनायां तु वाच्यव्यङ्ग्यया: समं प्राधान्यम्। अत वाच्योपसर्जनीभावने व्यङ्ग्यस्य तत्रावस्थानं तदा सोऽपि ध्वनिविषयोऽस्तु, न तु स एव ध्वनिरिति वक्तुं शक्यम्। पर्यायोक्तनिर्दिष्टन्यायात्।

## लोचनम्

अत्र मृगाङ्गनावलोकनेन तदवलोकनस्योपमा यद्यपि व्यङ्ग्या, तथापि वाच्यस्य सा सन्देहालङ्कारस्याभ्युत्थानकारिणीत्वेनानुग्राहकत्वाद् गुणीभूता, अनुग्राह्यात्वेन हि सन्देहे पर्यवसानम्। यथोक्तम्—

**परस्परोपकारेण यत्रालङ्कृतयः स्थिताः।**
**स्वातन्त्र्येणात्मलाभं नो लभन्ते सोऽपि सङ्करः।।**

तदाह—*यादालङ्कार* इत्यादि।। एवं चुतर्थेऽपि प्रकारे ध्वनिता निराकृता। मध्यमयोस्तु व्यङ्ग्यसम्भावनैव नास्तीत्युक्तम्। आद्ये तु प्रकारे 'शशिवदने' त्याद्युदाहृते कथञ्चिदस्ति सम्भावनेत्याशङ्क्य निराकरोति—*अलङ्कारद्वयेति। सममिति।* द्वयोरप्यान्दोल्यमानत्वादिति भावः। ननु यत्र व्यङ्ग्यमेव प्राधान्येन भाति तत्र किं कर्तव्यम्। यथा—

अपि च सङ्करालङ्कारेऽपि च क्वचित् सङ्करोक्तिरेव ध्वनिसम्भावनां निराकरोति।

## लोचनम्

**होइ ण गुणाणुराओ खलाणँ णवरं पसिद्धिसरणाणम्।**
**किर पहिणुसइ ससिमणं चन्दे पिआमुहे दिट्ठे ॥**

अत्रार्थान्तरन्यासस्तावद्वाच्यत्वेनाभाति, व्यतिरेकापह्नुती तु व्यङ्ग्यत्वेन प्रधानतयेत्यभिप्रायेणाशङ्कते–*अथेति।* तत्रोत्तरम्–*तदा सोऽपीति।* सङ्करालङ्कार एवायं न भवति, अपि त्वलङ्कारध्वनिनामायं ध्वनेर्द्वितीयो भेदः। यच्च पर्यायोक्ते निरूपितं तत्सर्वमत्राप्यनुसरणीयम्। अथ सर्वेषु सङ्करप्रभेदेषु व्यङ्ग्यसम्भा-वनानिरासप्रकारं साधारणमाह–*अपि चेति।* 'क्वचिदपि सङ्करालङ्कारे चे'ति सम्बन्धतः, सर्वभेदाभिन्न इत्यर्थः। सङ्कीर्णता हि मिश्रत्वं लोलीभावः, तत्र कथमेकस्य प्राधान्यं क्षीरजलवत्।

**अधिकारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः।**
**अप्रस्तुतप्रशंसा सा त्रिविधा परिकीर्त्तिता ॥**

## ध्वन्यालोकः

अप्रस्तुतप्रशंसायामपि यदा सामान्यविशेषभावान्निमित्तनिमित्तिभावाद्वा अभिधीयमानस्याप्रस्तुतस्य प्रतीयमानेन प्रस्तुतेनाभिसम्बन्धस्तदाभिधीयमान-प्रतीयमानयोः सममेव प्राधान्यम्।

## लोचनम्

अप्रस्तुतस्य वर्णनं प्रस्तुताक्षेपिण इत्यर्थः। स चाक्षेपस्त्रिविधो भवतिसामान्य-विशेषभावात्, निमित्तनिमित्तिभावात्, सारूप्याच्च। तत्र प्रथमे प्रकारद्वये प्रस्तुताप्रस्तुतयोस्तुल्यमेव प्राधान्यमिति प्रतिज्ञां करोति–*अप्रस्तुतेत्यादिना प्राधान्यमित्यन्तेन।* तत्र सामान्यविशेषभावेऽपि द्वयी गतिः–सामान्यमप्राकरणिकं शब्देनोच्यते, गम्यते तु प्राकरणिको विशेषः स एकः प्रकारः। यथा–

**अहो संसारनैर्घृण्यमहो दौरात्म्यमापदाम्।**
**अहो निसर्गजिह्मस्य दुरन्ता गतयो विधेः ॥**

अत्र हि देवप्राधान्यं सर्वत्र सामान्यरूपमप्रस्तुतं वर्णितं सत्प्रकृते वस्तुनि क्वापि विनष्टे विशेषात्मनि पर्यवस्यति। तत्रापि विशेषांशस्य

NOTES

## ध्वन्यालोकः

यदा तावत्सामान्यस्याप्रस्तुतस्याभिधीयमानस्य प्राकरणिकेन विशेषेण प्रतीयमानेन सम्बन्धस्तदा विशेषप्रतीतौ सत्यामपि प्राधान्येन तत्सामान्येनाविनाभावात्सामान्यस्यापि प्राधान्यम्। यदापि विशेषस्य सामान्यनिष्ठत्वं तदापि सामान्यस्य प्राधान्ये सामान्ये सर्वविशेषाणामन्तर्भावाद्विशेषस्यापि प्राधान्यम्।

## लोचनम्

सामान्येन व्याप्तत्वाव्यङ्ग्यविशेषवद्वाच्यसामान्यस्यापि प्राधान्यम्, न हि सामान्यविशेषयोर्युगपत्प्राधान्यं विरुध्यते। यदा तु विशेषोऽप्राकरणिकः प्राकरणिकं सामान्यमाक्षिपति तदा द्वितीयः प्रकारः। यथा–

**एतत्तस्य मुखात्कियत्कमलिनीपत्रे कणं पाथसो**
**यन्मुक्तामणिरित्यमंस्त स जडः शृण्वन्यदस्मादपि।**
**अङ्गुल्यग्रलघुक्रियाप्रविलयिन्यादीयमाने शनै-**
**स्तत्रोड्डीय गतो हहेत्यनुदिनं निद्राति नान्तः शुचा ॥**

अत्रास्थाने महत्त्वसम्भावनं सामान्यं प्रस्तुतम् अप्रस्तुतं तु जलबिन्दौ मणित्वसम्भावनं विशेषरूपं वाच्यम्। तत्रापि सामान्यविशेषयोर्युगपत्प्राधान्ये।

## ध्वन्यालोकः

**निमित्तनिमित्तिभावे चायमेव न्यायः।**

## लोचनम्

न विरोध इत्युक्तम्। एवमेकः प्रकारो द्विभेदोऽपि विचारितः, *यदा तावदित्यादिना विशेषस्यापि प्राधान्यमित्यन्तेन।* एतमेव न्यायं निमित्तनैमित्तिकभावेऽतिदिशंस्तस्यापि द्विप्रकारतां दर्शयति–*निमित्तेति।* कदाचिन्निमित्तमप्रस्तुतं सदभिधीयमानं नैमित्तिकं प्रस्तुतमाक्षिपति। यथा–

**ये यान्त्यभ्युदये प्रीतिं नौज्झन्ति व्यसनेषु च ।**
**ते बान्धवास्ते सुहृदो लोकः स्वार्थपरोऽपरः ॥**

अत्राप्रस्तुतं सुहृद्बान्धवरूपत्वं निमित्तं सज्जनासक्तया वर्णयति नैमित्तिकीं श्रद्धेयवचनतां प्रस्तुतामात्मनोऽभिव्यङ्क्तुम्; तत्र नैमित्तिकप्रतीतावपि निमित्तप्रतीतिरेव प्रधानीभवत्यनुप्राणकत्वेनेति व्यङ्ग्यव्यञ्जकयोः प्राधान्यम्। कदाचित्तु नैमित्तिकमप्रस्तुतं वर्ण्यमानं सत्प्रस्तुतं निमित्तं व्यनक्ति। यथा सेतौ–

NOTES

### लोचनम्

**सग्गं अपारिजाअं कोत्थुहलच्छिरहिअं महुमहस्स उरम् ।**
**सुमरामि महणपुरओ अमुद्धअन्दं च हरजडापब्भारम् ।**

अत्र जाम्बवान् कौस्तुभलक्ष्मीविरहितहरिवक्षः स्मरणादिकमप्रस्तुतनैमित्तिकं वर्णयति प्रस्तुतं वृद्धसेवाचिरजीवित्वव्यवहारकौशलादिनिमित्तभूतं मन्त्रितायामु-पादेयमभिव्यङ्क्तुम्। तत्र निमित्तप्रतीतावपि नैमित्तिकं वाच्यभूतं प्रत्युत तन्निमित्तानुप्राणितत्वेनोद्धुरकन्धरीकरोत्यात्मानमिति समप्रधानतैव वाच्यव्यङ्ग्ययोः। एवं द्वौ प्रकारौ प्रत्येकं द्विविधौ विचार्य तृतीयः प्रकारः परीक्ष्यते सारूप्यलक्षणः। तत्रापि द्वौ प्रकारौअप्रस्तुतात्कदाचिद्वाच्याच्चमत्कारः, व्यङ्ग्यं तु तन्मुखप्रेक्षम्। यथास्मदुपाध्यायभट्टेन्दुराजस्य—

**प्राणा येन समर्पितास्तव बलाद्येन त्वमुत्थापितः**
**स्कन्धे यस्य चिरं स्थितोऽसि विदधे यस्ते सपर्यामति ।**
**तस्यास्य स्मितमात्रकेण जनयन् प्राणापहारक्रियां**
**भ्रातः प्रत्युकारिणां धुरि परं वेताल लीलायसे ॥**

अत्र यद्यपि सारूप्यवशेन कृतघ्नः कश्चिदन्यः प्रस्तुत आक्षिप्यते, तथाप्यप्रस्तुतस्यैव वेतालवृत्तान्तस्य चमत्कारकारित्वम्। न

### लोचनम्

ह्यचेतनोपालम्भवदसम्भाव्यमानोऽयमर्थो न च न हृद्य इति वाच्यस्यात्र प्रधानता। यदि पुनरचेतनादिनात्यन्तासम्भाव्यमानतदर्थविशेषणेनाप्रस्तुतेन वर्णितेन प्रस्तुतमाक्षिप्यमाणं चमत्कारकारि तदा वस्तुध्वनिरसौ। यथा ममैव—

**भावव्रात हठाज्जनस्य हृदयान्याक्रम्य यन्नर्तयन्**
**भङ्गीभिर्विविधाभिरात्महृदयं प्रच्छाद्य संक्रीडसे ।**
**स त्वामाह जडं ततः सहृदयम्मन्यत्वदुःशिक्षितो**
**मन्येऽमुष्य जडात्मता स्तुतिपदं त्वत्साम्यसम्भावनात् ॥**

कश्चिन्महापुरुषो वीतरागोऽपि सरागवदिति न्यायेन गाढविवेकालोकतिरस्कृत-तिमिरप्रतानोऽपि लोकमध्ये स्वात्मानं प्रच्छादयल्ँलोकं च वाचालयन्नात्मन्यप्रतिभा-समेवाङ्गीकुर्वंस्तेनैव लोकेन मुर्खोऽयमिति यदवज्ञायते तदा तदीयं लोकोत्तरं चरितं प्रस्तुतं व्यङ्ग्यतया प्राधान्येन प्रकाश्यते। जडोऽयमिति ह्युद्यानेन्दूदयादिर्भावो लोकेनावज्ञायते, स च प्रत्युत कस्यचिद्विरहिण औत्सुक्यचिन्तादूयमानमानसतामन्यस्य प्रहर्षपरवशतां करोतीति हठादेव लोकं यथेच्छं विकारकारणाभिर्नर्तयति। न

NOTES

## ध्वन्यालोकः

यदा तु सारूप्यमात्रवशेनाप्रस्तुतप्रशंसायामप्रकृतप्रकृतयोः सम्बन्धस्तदाप्य-प्रस्तुतस्य सरूपस्याभिधीयमानस्य प्राधान्येनाविवक्षायां ध्वनावेवान्तःपातः। इतरथा त्वलङ्कारान्तरमेव। तदयमत्र सङ्क्षेपः–

## लोचनम्

च तस्य हृदयं केनापि ज्ञायते कीदृगयमिति, प्रत्युत महागम्भीरोऽतिविदग्धः सुष्ठु गर्वहीनोऽतिशयेन क्रीडाचतुरः स यदि लोकेन जड इति तत एव कारणात्प्रत्युत वैदग्ध्यसम्भावननिमित्तिस्सम्भावितः, आत्मा च यत एव कारणात्प्रत्युत जाड्येन सम्भाव्यस्तत एव सहृदयः सम्भावितस्तदस्य लोकस्य जडोऽसीति यद्युच्यते तदा जाड्यमेवंविधस्य भावव्रातस्याविदग्धस्य प्रसिद्धमिति सा प्रत्युत स्तुतिरिति। जडादपि पापीयानयं लोक इति ध्वन्यतो। तदाह–

*यदा त्विति। इतरथा त्विति।* इतरथैव पुनरलङ्कारान्तरत्वमलङ्कारविशेषत्वं न व्यङ्ग्यस्य कथंचिदपि प्राधान्य इति भावः। उद्देशे यदादिग्रहणं कृतं समासोक्तीत्यत्र द्वन्द्वे तेन व्याजस्तुतिप्रभृतिरलङ्कारवर्गोऽपि सम्भाव्यमानवव्यङ्ग्यानुवेशः सम्भावितः। तत्र सर्वत्र साधारणमुत्तरं दातुमुपक्रमते–*तदयमत्रेति।* कियद्वा प्रतिपदं लिख्यतामिति भावः। तत्र व्याजस्तुतिर्यथा–

## लोचनम्

**किं वृत्तान्तैः परगृहगतैः किन्तु नाहं समर्थ-**
**स्तूष्णीं स्थातुं प्रकृतिमुखरो दाक्षिणात्यस्वभावः।**
**गेहे गेहे विपणिषु तथा चत्वरे पानगोष्ठ्या-**
**मुन्मत्तेव भ्रमति भवतो वल्लभा हन्त कीर्तिः॥**

अत्र व्यङ्ग्यं स्तुत्यात्मकं यत्तेन वाच्यमेवोपस्क्रियते। यत्तूदाहृतं केनचित्–

**आसीन्नाथ पितामही तव मही जाता ततोऽनन्तरं**
**माता सम्प्रति साम्बुराशिरशना जाया कुलोद्भूतये।**
**पूर्णे वर्षशते भविष्यति पुनः सैवानवद्या स्नुषा**
**युक्तं नाम समग्रनीतिविदुषां किं भूपतीनां कुले॥**

NOTES

## लोचनम्

इति, तदस्माकं ग्राम्यं प्रतिभात्यत्यन्तासभ्यस्मृतिहेतुत्वात्। का चानेन स्तुतिः कृता? त्वं वंशक्रमेण राजेति हि कियदिदम्? इत्येवंप्राया व्याजस्तुतिः सहृदयगोष्ठीषु निन्दितेत्युपेक्ष्यैव।

**यस्य विकारः प्रभवन्नप्रतिबन्धूस्तु हेतुना येन।**
**गमयति तमभिप्रायं तत्प्रतिबन्धं च भावोऽसौ॥ इति।**

अत्रापि वाच्यप्राधान्ये भावालङ्कारता:। यस्य चित्तवृत्तिविशेषस्य सम्बन्धी वाग्व्यापारादिर्विकारोऽप्रतिबन्धो नियतः प्रभवंस्तं चित्तवृत्तिविशेषरूपमभिप्रायं येन हेतुना गमयति स हेतुर्यथेष्टोपभोग्यत्वादिलक्षणोऽर्थो भावालङ्कारः। यथा–

**एकाकिनी यदबला तरुणी तथाहमस्मिन्नगृहे गृहपतिश्च गतो विदेशम्।**
**कं याचसे तदिह वासमियं वराकी श्वश्रूर्ममान्धबधिरा ननु मूढ पान्थ॥**

**अत्र व्यङ्ग्यमेकैकत्र पदार्थे उपस्कारकारीति वाच्यं प्रधानम्।**
**व्यङ्ग्यप्राधान्ये तु न काचिदलङ्कारतेति निरूपितमित्यलं बहुना॥**

## ध्वन्यालोकः

**व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः।**
**सामासोक्त्यादयस्तत्र वाच्यालङ्कृतयः स्फुटाः॥**

**व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा।**
**न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते॥**

**तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रति स्थितौ।**
**ध्वनेः स एव विषयो मन्तव्यः सङ्करोज्झितः॥**

## लोचनम्

*यत्रेति* काव्ये। *अलङ्कृतय* इति। अलङ्कृतित्वादेव च वाच्योपस्कारकत्वम्। *प्रतिभामात्र* इति। यत्रोपमादौ म्लिष्टार्थप्रतीतिः। *वाच्यार्थानुगम* इति। वाच्येनार्थेनानुगमः समं प्राधान्यमप्रस्तुतप्रशंसायामिवेत्यर्थः। *न प्रतीयत* इति। स्फुटतया प्राधान्यं न चकास्ति, अपि तु बलात्कल्प्यते, तथापित हृदये नानुप्रविशति। यथा–'देआ पसिअणिआतासु' इत्यत्रान्यकृतासु व्याख्यासु। तेन चतुर्षु प्रकारेषु न ध्वनिव्यवहारः सद्भावेऽपि व्यङ्ग्यस्य अप्राधान्ये म्लिष्टप्रतीतौ वाच्येन समप्राधान्येऽस्फुटे प्राधान्ये च। क्व तर्ह्यसावित्याह–*तत्परावेवेति*।

## ध्वन्यालोकः

तस्मान्न ध्वनेरन्यत्रान्तर्भावः। इतश्च नान्तर्भावः; यतः काव्यविशेषोऽङ्गी ध्वनिरिति कथितः। तस्य पुनरङ्गानि–अलंकारा गुणा वृत्तयश्चेति प्रतिपादयिष्यन्ते। न चावयव एव पृथग्भूतोऽवयवीति प्रसिद्धः। अपृथग्भावे तु तदङ्गत्वं तस्य। न तु तत्त्वमेव। यत्रापि वा तत्त्वं

## लोचनम्

सङ्करेणालङ्करानुप्रवेशसम्भावनया उज्झित इत्यर्थः। सङ्करालङ्कारेणेति त्वसत्, अन्यालङ्कारोपलक्षणत्वे हि क्लिष्टं स्यात्। *इतश्चेति* । न केवलमन्योन्यविरुद्ध–वाच्यवाचकभावव्यङ्ग्यव्यञ्जकभावसमाश्रयत्वान्न तादात्म्यमलङ्काराणां ध्वनेश्च यावत्स्वाउमिभृत्यवदङ्गिरूपाङ्गरूपयोर्विरोधादित्यर्थः। *अवयव* इति। एकैक इत्यर्थः। तदाह–*पृथग्भूत* इति। अथ पृथग्भूतस्तथा मा भूत्, समुदायमध्यनिपतितस्तर्ह्यस्तु तथेत्याशङ्क्याह–*अपृथग्भावे त्विति।* तदापि न स एक एव समुदायः, अन्येषामति समुदायिनां तत्र भावात्; तत्समुदायिमध्ये च प्रतीयमानमप्यस्ति, न च तदलङ्काररूपं, प्रधानत्वादेव। तत्त्वलङ्काररूपं तदप्रधानत्वान्न ध्वनिः। तदाह–*न तु*

## ध्वन्यालोकः

तत्रापि ध्वनेर्महाविषयत्वान्न तन्निष्ठत्वमेव। 'सूरिभिः कथित' इति विद्वदुपज्ञेयमुक्तिः, न तु यथाकथञ्चित्प्रवृत्तेति प्रतिपाद्यते। प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति।

## लोचनम्

*तत्त्वमेवेति।* नन्वलङ्कार एव कश्चित्त्वया प्रधानताभिषेकं दत्त्वा ध्वनिरित्यात्मेति चोक्त इत्याशङ्क्याह–*यत्रापि* वेति। न हि समासोक्त्यादीनामन्यतम एवासौ तथास्माभिः कृतः, तद्विविक्तत्वेऽपि तस्य भावात्, समासोक्त्याद्यलङ्कारस्वरूपस्य समस्तस्याभावेऽपि तस्य दर्शितत्वात् 'अत्ता एत्थ' इति 'कस्स वा ण' इत्यादि; तदाह–न *तन्निष्ठत्वमेवेति। विद्वदुपज्ञेति।* विद्वद्भ्य उपज्ञा प्रथम उपक्रमो यस्या उक्तेरिति बहुव्रीहिः। तेन 'उपज्ञोपक्रमम्' इति तत्पुरुषाश्रयं नपुंसकत्वं निरवकाशम्। *श्रूयमाणेष्विति।*

NOTES

## लोचनम्

श्रोत्रशष्कुलीं सन्तानेनागता अन्त्याः शब्दाः श्रूयन्त इति प्रक्रियायां शब्दजाः शब्दाः श्रूयमाणा इत्युक्तम्। तेषां घण्टानुरणनरूपत्वं तावदस्ति; ते च ध्वनिशब्देनोक्ताः। यथाह भगवान् भर्तृहरिः–

**यः संयोगवियोगाभ्यां करणैरुपजन्यते।**
**स स्फोटः शब्दजाश्शब्दा ध्वनयोऽन्यैरुदाहृताः॥ इति।**

एवं घण्टादिनिर्ह्लादस्थानीयोऽनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृतः। तथा श्रूयमाणा ये वर्णा नादशब्दवाच्या अन्त्यबुद्धिनिर्ग्राह्यस्फोटाभिव्यञ्जकास्ते ध्वनिशब्देनोक्ताः। यथाह भगवान् स एव–

**प्रत्ययैरनुपाख्येयैर्ग्रहणानुगुणैस्तथा ।**
**ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥ इति।**

तेन व्यञ्जकौ शब्दार्थावपीह ध्वनिशब्देनोक्तौ। किञ्च वर्णेषु तावन्मात्रपरिमाणेष्वपि सत्सु। यथोक्तम्–

**अल्पीयसापि यत्नेन शब्दमुच्चारितं मतिः।**
**यदि वा नैव गृह्णाति वर्णं वा सकलं स्फुटम्॥ इति।**

## ध्वन्यालोकः

तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्व–

## लोचनम्

तेषु तावत्स्वेव श्रुयमाणेषु वक्तुर्योऽन्यो द्रुतविलम्बितादिवृत्तिभेदात्मा प्रसिद्धादुच्चारणव्यापारादभ्यधिकः स ध्वनिरुक्तः। यदाह स एव–

**शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदे तु वैकृताः।**
**ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥ इति।**

अस्माभिरपि प्रसिद्धेभ्यः शब्दव्यापारेभ्योऽभिधातात्पर्यलक्षणारूपेभ्योऽतिरिक्तो व्यापारो ध्वनिरित्युक्तः। एवं चतुष्कमति ध्वनिः। तद्योगाच्च समस्तमपि काव्यं ध्वनिः। तेन व्यतिरेकाव्यतिरेकव्यपदेशोऽपि न युक्तः। *वाच्यवाचकसंमिश्र इति।* वाच्यवाचकसहितः संमिश्र इति मध्यमपदलोपी समासः। 'गामश्वं पुरुषं पशुम्'

NOTES

इतिवत्समुच्चयोऽत्र चकारेण विनापि। तेन वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, द्वयोरपि

## ध्वन्यालोकः

साम्याद् ध्वनिरित्युक्तः। न चैवंविधस्य ध्वनेर्वक्ष्यमाणप्रभेदतद्भेदसङ्कलनया माहविषयस्य यत्प्रकाशनं तदप्रसिद्धालङ्कारविशेषमात्रप्रतिपादनेन तुल्यमिति तद्भावितचेतसां युक्त एव संरम्भः। न

## लोचनम्

व्यञ्जकत्वं ध्वनतीति कृत्वा। संमिश्र्यते विभावानुभावसंवलनयेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यत इति कृत्वा। शब्दनं शब्दः शब्दव्यापारः, न चासावभिधादिरूपः, अपि त्वात्मभूतः, सोऽपि ध्वननं ध्वनिः। काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः, उक्तप्रकारध्वनिचतुष्टयमयत्वत्। अतएव साधारणहेतुमाह–*व्यञ्जकत्वसाम्यदिति।* व्यङ्ग्यव्यञ्जकभावः सर्वेषु पक्षेषु सामान्यरूपः साधारण इत्यर्थः। यत्पुनरेतदुक्तं 'वाग्विकल्पानामानन्त्यात्' इत्यादि, तत्परिहरति–*न चैवं विधस्येति।* वक्ष्यमाणः प्रभेदो यथा–मुख्ये द्वे रूपे। तद्भेदा यथा–अर्थान्त-रसंक्रमितवाच्यः, अत्यन्ततिरस्कृतवाच्य इत्यविवक्षितवाच्यस्य, असंलक्ष्यक्र-मव्यङ्ग्यः संलक्ष्यक्रमव्यङ्ग्य इति विवक्षितान्यपरवाच्यस्येति। तत्राप्यवान्तरभेदाः। *महाविषयस्येति*–अशेषलक्ष्यव्यापिन इत्यर्थः। विशेषग्रहणेनाव्यापकत्वमाह। मात्रशब्देनाङ्गि–

## ध्वन्यालोकः

च तेषु कथञ्चिदीर्ष्यया कलुषितशेमुषीकत्वमाविष्करणीयम्। तदेवं ध्वनेस्तावदभाववादिनः प्रत्युक्ताः।

अस्ति ध्वनिः। स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन।

## लोचनम्

त्वाभावम्। तत्र ध्वनिस्वरूपे भावितं प्रणिहितं चेतो येषां तेन वा चमत्काररूपेण भावितमधिवासितमत एव मुकुलितलोचनत्वादिविकारकारणं चेतो येषामिति। *अभाववादिन इति।* अवान्तरप्रकारत्रयभिन्ना अपीत्यर्थः।

NOTES

तेषां प्रत्युक्तौ फलमाह–*अस्तीति।* उदाहरणपृष्ठे भाक्तत्वं सुशङ्कं सुपरिहरं च भवतीत्यभिप्रायेणोदाहरणदानावकाशार्थं भाक्तत्वालक्षणीयत्वे प्रथमं परिहरणयोग्ये अप्यप्रतिसमाधाय भविष्यदुद्योतानुवादानुसारेण वृत्तिकृदेव प्रभेदनिरूपणं करोति–*स चेति।* पञ्चधापि ध्वनिशब्दार्थे येन यत्र यतो यस्य यस्मै इति बहुव्रीह्यार्थाश्रयेण यथोचित्तं सामानाधिकरण्यं सुयोज्यम्। वाच्येऽर्थे तु ध्वनौ वाच्यशब्देन स्वात्मा

## लोचनम्

तेनाविवक्षितोऽप्रधानीकृतः स्वात्मा येनेत्यविवक्षितवाच्यो व्यञ्जकोऽर्थः। एवं विवक्षितान्यपरवाच्येऽपि। यदि वा कर्मधारयेणार्थपक्षे अविवक्षितश्चासौ वाच्यश्चेति। विवक्षितान्यपरश्चासौ वाच्यश्चेति। तत्रार्थः कदाचिदनुपपद्यमानत्वादिना निमित्तेनाविवक्षितो भवति। कदाचिदुपपद्यमान इति कृत्वा विवक्षित एव, व्यङ्ग्यपर्यन्तां तु प्रतीतिं स्वसौभाग्यमहिम्ना करोति। अत एवार्थोऽत्र प्राधान्येन व्यञ्जकः पूर्वत्र शब्दः। ननु च विवक्षा चान्यपरत्वं चेति विरुद्धम्। अन्यपरत्वेनैव विवक्षणात्को विरोधः? *सामान्येनेति।* वस्त्वलङ्कारसात्मना हि त्रिभेदोऽपि ध्वनिरुभाभ्यामेवाभ्यां सङ्गृहीत इति भावः। ननु तन्नामपृष्ठे एतन्नामनिवेशनस्य कि फलम्? उच्यते–अनेन हि नामद्वयेन ध्वननात्मनि व्यापारे पूर्वप्रसिद्धाभिधातात्पर्यलक्षणात्मकव्यापारत्रितयावगतार्थप्रतीतेः प्रतिपत्तृगतायाः प्रयोक्त्रभिप्रायरूपायाश्च विवक्षायाः सहकारित्वमुक्तमिति ध्वनिस्वरूपमेव नामभ्यामेव प्रोज्जीवितम्।

## ध्वन्यालोकः

तत्राद्यस्योदाहरणण्–

**सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।**
**शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥**

द्वितीयस्यापि–

**शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः ।**
**तरुणि येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः॥ १३॥**

## लोचनम्

*सुवर्णपुष्पामिति।* सुवर्णनि पुष्प्यतीति सुवर्णपुष्पा, एतच्च वाक्यमेवासम्भवत्स्वार्थमिति कृत्वाऽविवक्षितवाच्यम्। तत एव पदार्थमभिधायान्वयं च तात्पर्यशक्तयावगमय्यैव बाधकवशेन तमुपहत्य सादृश्यात्सुलभसमृद्धिसम्भारभाजनतां

NOTES

लक्षयति। तल्लक्षणाप्रयोजनं शूरकृतविद्यसेवकानां प्राशस्त्यमशब्दवाच्यत्वेन गोप्यमानं सन्नायिकाकुचकलशयुगलमिव महार्घतामुपयद् ध्वन्यत इति। शब्दोऽत्र प्रधानतया व्यञ्जकः, अर्थस्तु तत्सहकारितयेति चत्वारो व्यापाराः।

## लोचनम्

*शिखरिणीति।* न हि निर्विघ्नोत्तमसिद्ध्योऽपि श्रीपर्वतादय इमां सिद्धिं विदध्युः। दिव्यकल्पसहस्रादिश्चात्र परिमितः कालः। न चैवंविधोत्तमफलजनकत्वेन पञ्चाग्निप्रभृत्यपि तपः श्रुतम्। तवेति भिन्नं पदम्। समासेन विगलिततया प्रतीयेत, तव दशतीत्यभिप्रायेण। तेन यदाहुः–'वृत्तानुरोधात्त्वदधरपाटलमिति न कृतम्' इति, तदसदेव; दशतीत्यास्वादयति अविच्छिन्नप्रबन्धतया, न त्वौदरिकवत्परं भुङ्क्ते; अपि तु रसज्ञोऽत्रेति तत्प्राप्तिवदेव रसज्ञताप्यस्य तपः प्रभावादेवेति। शुकशावक इति तारुण्यादुचितकाललाभोऽपि तपस एवेति। अनुरागिणश्च प्रच्छन्नस्वाभिप्रायख्यापनवैदग्ध्यचाटुविरचनात्मकविभावोद्दीपनं व्यङ्ग्यम्।

अत्र च त्रय एव व्यापाराः–अभिधा तात्पर्यं ध्वननं चेति। मुख्यार्थबाधाद्यभावे मध्यमकक्ष्यायां लक्षणायास्तृतीयस्या अभावात्। यदि

## ध्वन्यालोकः

**यदप्युक्तं भक्तिर्ध्वनिरिति, तत्प्रतिसमाधीयते–**

## लोचनम्

वाऽऽकस्मिकविशिष्टप्रश्नार्थानुपपत्तेर्मुख्यार्थबाधायां सादृश्याल्लक्षणा भवतु मध्ये। तस्यास्तु प्रयोजनं ध्वन्यमानमेव तत्तुर्यकक्ष्यानिवेशि, केवलं पूर्वत्र लक्षणैव प्रधानं ध्वननव्यापारे सहकारि। इह त्वभिधातात्पर्यशक्ती। वाक्यार्थसौन्दर्यादेव व्यङ्ग्यप्रतिपत्तेः केवलं लेशेन लक्षणाव्यापारोपयोगोऽप्यस्तीत्युक्तम्। असंलक्ष्य-क्रमव्यङ्ग्ये तु लक्षणासमुन्मेषमात्रमपि नास्ति, असंलक्ष्यत्वादेव क्रमस्येति वक्ष्यामः। तेन द्वितीयेऽपि भेदे चत्वार एव व्यापाराः।। १३।।

अत एवोभयोदाहरणपृष्ठ एव भाक्तमाहुरित्यनुभाष्य दूषयति। अयं भावः–भक्तिश्च ध्वनिश्चेति किं पर्यायवत्ताद्रूप्यम्? अर्थ पृथिवीत्वमिव पृथिव्या अन्यतो व्यावर्तकधर्मरूपतया लक्षणम्? उत काक इव देवदत्तगृहस्य सम्भवमात्रादुपलक्षणम्? तत्र प्रथमं पक्षं निराकरोति–

**ध्वन्यालोक:**

**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।**

अयमुक्तप्रकारो ध्वनिर्भक्तया नैकत्वं बिभर्ति भिन्नरूपत्वात्। वाच्यव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये स ध्वनिः। उपचारमात्रं तु भक्तिः।

मा चैतत्स्याद्भक्तिर्लक्षणं ध्वनेरित्याह–

**अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया॥ १४॥**

## लोचनम्

*भक्त्या बिभर्तीति।* उक्तप्रकार इति पञ्चस्वर्थेषु योज्यम्–शब्देऽर्थे व्यापारे व्यङ्ग्ये समुदाये च। रूपभेदं दर्शयितुं ध्वनेस्तावद्रूपमाह–*वाच्येति। तात्पर्येण* विश्रान्तिधामतया प्रयोजनत्वेनेति यावत्। *प्रकाशनं* द्योतनत्यिर्थः। *उपचारमात्रमिति।* उपचारो गुणवृत्तिर्लक्षणा उपचरणमतिशयितो व्यवहार इत्यर्थः। मात्रशब्देनेदमाह–यत्र लक्षणाव्यापारात्तृतीयादन्यश्चतुर्थः प्रयोजनद्योतनात्मा व्यापारो वस्तुस्थित्या सम्भवन्नप्यनुपयुज्यमानत्वेनानाद्रियमाणत्वादसत्कल्पः। 'यमर्थमधिकृत्य' इति हि प्रयोजनलक्षणम्।

**ध्वन्यालोक:**

नैव भक्तया ध्वनिर्लक्ष्यते। कथम्? अतिव्याप्तेरव्याप्तेश्च। तत्रातिव्याप्तिर्ध्वनिव्यतिरिक्तेऽपि विषये भक्तेः सम्भवात्। यत्र हि व्यङ्ग्यकृतं महत्सौष्ठवं नास्ति तत्राप्युपचरितशब्दवृत्त्या प्रसिद्ध्यनुरोधप्रवर्तितव्यवहाराः कवयो दृश्यन्ते। यथा–

## लोचनम्

तत्रापि लक्षणास्तीति कथं ध्वननं लक्षणा चेत्येकं तत्त्वं स्यात्। द्वितीयं पक्षं दूषयति–*अतिव्याप्तेरिति।* असाविति ध्वनिः। तयेति भक्त्या। ननु ध्वननमश्वयम्भावीति कथं तद्व्यतिरिक्तोऽस्ति विषय इत्याह–*महत्सौष्ठवमिति।* अत एव प्रयोजनस्यानादरणीयत्वाद् व्यञ्जकत्वेन कृत्यं किञ्चिदिति भावः। महद्ग्रहणेन गुणमात्रं तद्भवति। यथोक्तम्–'समाधिरन्यधर्मस्य क्वाप्यारोपो विवक्षित' इति दर्शयति। ननु प्रयोजनाभावे कथं तथा व्यवहार इत्याह–*प्रसिद्ध्यनुरोधेति।* परम्परया तथैव प्रयोगात्।

NOTES

वयं तु ब्रूमः—प्रसिद्धिर्या पयोजनस्यानिगूढतेत्यर्थः। उत्तानेनापि रूपेण तत्प्रयोजनं चकासन्निगूढतां निधानवदपेक्षत इति भावः। वदतीत्युपचारे हि

**ध्वन्यालोकः**

**परिम्लानं पीनस्तजनघनसङ्गादुभयत-**
**स्तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।**
**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः**
**कृशाङ्ग्याः सन्तापं वदति बिसिनीपत्रशयनम्॥**

**तथा—**

**चुम्बिज्जइ असहुत्तं अवरुन्धिज्जइ सहस्सहुत्तम्मि।**
**विरमिअ पुणो रमिज्जइ पिओ जणो णत्थि पुनरुत्तम्॥**
**(शतकृत्वोऽवरुध्यते सहस्त्रकृत्वश्चुम्ब्यते।**
**विरम्य पुना रम्यते प्रियो जनो नास्ति पुनरुक्तम्॥**
**(इति च्छाया)**

**लोचनम्**

स्फूटीकरणप्रतिपत्तिः प्रयोजनतम्। यद्यगूढं स्वशब्देनोच्येत, किमचारुत्वं स्यात्? गूढतया वर्णने वा किं चारुत्वमधिकं जातम्? अनेनैवाशयेन वक्ष्यति—यत उक्तयन्तरेणाशक्यं यदिति। अवरुन्धिज्जइ आलिङ्ग्यते। पुनरुत्तमित्यनुपादेयता लक्ष्यते, उक्तार्थस्यासम्भवात्।

**ध्वन्यालोकः**

**तथा—**

**कुविआओ पसन्नाओ ओरणणमुहीओ विहसमाणाओ।**
**जह गहिओ तह हिअअं हरन्ति उच्छिन्नतमहिलाओ॥**

**तथा—**

**अज्जाएँ पहारो णवलदाए दिण्णो पिएण थणवट्टे।**
**मिउओ वि दूसहो व्विअ जाओ हिअए सवत्तीणम्॥**
**(भार्यायाः प्रहारो नवलतया दत्तः प्रियेण स्तनपृष्ठे।**
**मृदुकोऽपि दुःसह इव जातो हृदये सपत्नीनाम्॥**
**इति च्छाया)**

NOTES

### लोचनम्

**कुपिताः प्रसन्ना अवरुदितवदना विहसन्त्यः ।**
**यथा गृहीतास्तथा हृदयं हरन्ति स्वैरिण्यो महिलाः ॥**

अत्र ग्रहणेनोपादेयता लक्ष्यते। हरणेन तत्परतन्त्रतापत्तिः।

*तथा–अज्जेति।* कनिष्ठभार्यायाः स्तनपृष्ठे नवलतया कान्तेनोचितक्रीडायोगेन मृदुकोऽपि प्रहारो दत्तः सपत्नीनां सौभाग्यसूचकं तत्क्रीडासंविभागमप्राप्तानां हृदये दुःसहो जातः, मृदुरपीति चित्रम्। दानेनात्र फलवत्त्वं लक्ष्यते।

### ध्वन्यालोकः

**तथा–**

**परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो**
**यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः ।**
**न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः**
**किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः ॥**

इत्यत्रेक्षुपक्षेऽनुभवतिशब्दः। न चैवंविधः कदाचिदपि ध्वनेर्विषयः।

### लोचनम्

*तथा–परार्थेति।* यद्यपि प्रस्तुतमहापुरुषापेक्षयानुभवतिशब्दो मुख्य एव, तथाप्यप्रस्तुते इक्षौ प्रशस्यमाने पीडाया अनुभवनेनासम्भवता पीडावत्त्वं लक्ष्यते; तच्च पीड्यमानत्वे पर्यवस्यति।

नन्वस्त्यत्र प्रयोजनं तत्किमिति न ध्वन्यत इत्याशङ्क्याह–*न चैवं विध इति।। १४।।*

*यत उक्तयन्तरेणेति।* उक्तत्यन्तरेण ध्वन्यतिरिक्तेन स्फुटेन शब्दार्थव्यापार-विशेषेणेत्यर्थः। शब्द इति पञ्चस्वर्थेषु योज्यम्।

### ध्वन्यालोकः

**यतः–**

**उक्त्यन्तरेणाशक्यं यत्तच्चारुत्वं प्रकाशयन् ।**
**शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत् ॥ १५॥**

NOTES

अत्र चोदाहृते विषये नोक्तयन्तराशक्यचारुत्वव्यक्तिहेतुः शब्दः। किञ्च–

### लोचनम्

*ध्वन्युक्तेर्विषयीभवेदिति*–ध्वनिशब्देनोच्यत इत्यर्थः। *उदाहृत इति।* वदतीत्यादौ।। १५।।

एवं यत्र प्रयोजनं सदपि नादरास्पदं तत्र को ध्वननव्यापार इत्युक्तवा यत्र मूलत एव प्रयोजनं नास्ति, भवति चोपचारस्तत्रापि को ध्वननव्यापार इत्याह–*किञ्चेति।* लावण्याद्या ये शब्दाः स्वविषयाल्लवणरसयुक्तत्वादेः स्वार्थादन्यत्र हृद्यत्वादौ रूढाः, रूढत्वादेव त्रितयसन्निध्यपेक्षणव्यवधानशून्याः। यदाह–

**'निरूढा लक्षणाः काश्चित्सामर्थ्यादभिधानवत्।'**

### ध्वन्यालोकः

**रुढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि ।**
**लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः।। १६।।**

तेषु चोपचरितशब्दवृत्तिरस्तीति। तथाविधे च विषये क्वचित्सम्भवपि ध्वनिव्यवहारः प्रकारान्तरेण प्रवर्तते। न तथाविधशब्दमुखेन।

### लोचनम्

इति। ते तस्मिन् स्वविषयादन्यत्र प्रयुक्ता अपि न ध्वनेः पदं भवन्ति; न तत्र ध्वनिव्यवहारः। उपचरिता शब्दस्य वृत्तिर्गौणी; लाक्षणिकी चेत्यर्थः। आदिग्रहणेनानुलोम्यं प्रातिकूल्यं सब्रह्मचारीत्येवमादयः शब्दा लाक्षणिका गृह्यन्ते। लोम्नामनुगतमनुलोमं मर्दनम्। कूलस्य प्रतिपक्षतया स्थितं स्रोतः प्रतिकूलम्। तुल्यगुरुः सब्रह्मचारी इति मुख्यो विषयः। अन्य पुनरुपचरित एव। न चात्र प्रयोजनं किञ्चिदुद्दिश्य लक्षणा प्रवृत्तेति न तद्विषयो ध्वननव्यवहारः।

ननु 'देवडिति लुणाहि पलुत्रम्मिगमिज्वालवणुज्वलं गुमरिफेल्लपरण्य' (?) इत्यादौ लावण्यादिशब्दसन्निधानेऽस्ति

### ध्वन्यालोकः

अपि च–

**मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम् ।**
**यदुद्दिश्य फलं तत्र शब्दो नैव स्खलद्गतिः।। १७।।**

NOTES

## लोचनम्

प्रतीयमानाभिव्यक्तिः; सत्यम्, सा तु न लावण्यशब्दात्। अपि तु समग्रवाक्यार्थप्रतीत्यनन्तरं ध्वननव्यापारादेव। अत्र हि प्रियतमामुखस्यैव समस्ताशाप्रकाशकत्वं ध्वन्यत इत्यलं बहुना। तदाह—*प्रकारान्तरेणेति।* व्यञ्जकत्वेनैव। न तूपचरितलावण्यादिशब्दप्रयोगादित्यर्थः।। १६।।

एवं यत्र यत्र भक्तिस्तत्र तत्र ध्वनिरिति तावन्नास्ति। तेन यदि ध्वनेर्भक्तिर्लक्षणं तदा भक्तिसान्निधौ सर्वत्र ध्वनिव्यवहारः स्यादित्यतिव्याप्तिः। अभ्युपगम्यापि ब्रूमः—भवतु यत्र यत्र भक्तिस्तत्र तत्र ध्वनिः। तथापि यद्विषयो लक्षणाव्यापारो न तद्विषयो ध्वननव्यापारः। न च भिन्नविषययोर्धर्मधर्मिभावः, धर्म एव च लक्षणमित्युच्यते। तत्र लक्षणा तावदमुख्यार्थविषयो व्यापारः। ध्वननं च प्रयोजनविषयम्। न च

## ध्वन्यालोकः

तत्र हि चारुत्वातिशयविशिष्टार्थप्रकाशनलक्षणे प्रयोजने कर्तव्ये यदि शब्दस्यामुख्यता तदा तस्य प्रयोगे दुष्टतैव स्यात्। न चैवम्; तस्मात—

## लोचनम्

तद्विषयोऽपि द्वितीयो लक्षणाव्यापारो युक्तः, लक्षणासामग्र्यभावादित्यभिप्रायेणाह—*अपि चेत्यादि।* मुख्यां वृत्तिमभिधाव्यापारं परित्यज्य परिसमाप्य गुणवृत्त्या लक्षणारूपयार्थस्यामुख्यस्य दर्शनं प्रत्यायना, सा यत्फलं कर्मभूतं प्रयोजनरूपमुद्दिश्य क्रियते, तत्र प्रयोजने तावद् द्वितीयो व्यापारः। न चासौ लक्षणैव; यतः स्खलन्ती बाधकव्यापारेण विधुरीक्रियमाण गतिरवबोधनशक्तिर्यस्य शब्दस्य तदीयो व्यापारो लक्षणा। न च प्रयोजनमवगमयतः शब्दस्य बाधकयोगः। तथाभावे तत्रापि निमित्तान्तरस्य प्रयोजनान्तरस्य चान्वेषणेनानवस्थानात्। तेनायं लक्षणलक्षणाया न विषय इति भावः। दर्शनमिति ण्यन्तो निर्देशः। *कर्तव्य इति।* अवगमयितव्य इत्यर्थः। *अमुख्यतेति।* बाधकेन बिधुरीकृततेत्यर्थः। *तस्येति* शब्दस्य। *दुष्टतैवेति।* प्रयोजनावगमस्य सुखसम्पत्तये हि स शब्दः

## ध्वन्यालोकः

**वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता ।**
**व्यञ्जकत्वैकमूलस्य ध्वेनः स्याल्लक्षणं कथम् ॥ १८॥**

तस्मादन्यो ध्वनिरन्या च गुणवृत्तिः। अव्याप्तिरप्यस्य लक्षणस्य।

NOTES

## लोचनम्

प्रयुज्यते तस्मिन्नमुख्यार्थे। यदि च 'सिंहो वटुः' इति शौर्यातिशयेऽप्यवगमयितव्ये स्खलद्गतित्वं शब्दस्य तर्हि तत्प्रतीतिं नैव कुर्यादिति किमर्थं तस्य प्रयोगः। उपचारेण करिष्यतीति चेत्तत्रापि प्रयोजनान्तरमन्वेष्यं तत्राप्युपचार इत्यनवस्था। अथ न तत्र स्खलद्गतित्विं, तर्हि प्रयोजनेऽवगमयितव्ये न लक्षणाख्यो व्यापारः तत्सामग्यंभावात्। न च नास्ति व्यापारः। न चासावभिधा, समयस्य तत्राभावात्। यद्व्यापारान्तरमभिधालक्षणातिरिक्तं स ध्वननव्यापरः। *न चैवमिति।* न च प्रयोगे दुष्टता काचित्, प्रयोजनस्याविघ्नेनैव प्रतीतेः। तेनाभिधैव मुख्येऽर्थे बाधकेन

## लोचनम्

प्रविवित्सुर्निरुध्यमाना सती अचरितार्थत्वादन्यत्र प्रसरति। अत एव अमुख्योऽस्यायमर्थ इति व्यवहारः। तथैव चामुख्यतया सङ्केतग्रहणमति तत्रास्तीत्यभिधापुच्छभूतैव लक्षणा।। १७।।

उपसंहरति–*तस्मादिति।* यतोऽभिधापुच्छभूतैव लक्षणा, ततो हेतोर्वाचकत्वमभि-धाव्यापारमाश्रिता तद्बाधनेनोत्थानात्तत्पुच्छभूतत्वाच्च गुणवृत्तिः गौणलाक्षणिकप्रकार इत्यर्थः। सा कथं ध्वनेर्व्यञ्जनात्मनो लक्षणं स्यात्? भिन्नविषयत्वादिति। एतदुपसंहरित–*तस्मादिति।*

यतोऽतिव्याप्तिरुक्ता तत्प्रसङ्गेन च भिन्नविषयत्वं तस्मादित्यर्थः। एवम् 'अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया' इति कारिकागतामतिव्याप्तिं व्याख्यायाव्याप्तिं व्याचष्टे–*अव्याप्तिरप्यस्येति।* अस्य गुणवृत्तिरूपस्येत्यर्थः। यत्र यत्र ध्वनिस्तत्र तत्र यदि भक्तिर्भवेन्न स्यादव्याप्तिः। न चैवम्; अविवक्षितवाव्येऽस्ति भक्तिः 'सुवर्णपुष्पाम्' इत्यादौ। 'शिखरिणि' इत्यादौ तु सा कथम्। ननु लक्षणा तावद्गौणमपि व्याप्नोति। केवलं शब्दस्तमर्थं

## लोचनम्

लक्षयित्वा तेनैव सह सामानाधिकरण्यं भजते–'सिंहो बटुः' इति। अर्थोवाऽर्थान्तरं लक्षयित्वा स्ववाचकेन तद्वाचकं समानाधिकरणं करोति। शब्दार्थौ वा युगपत्तं लक्षयित्वा अन्याभ्यामेव शब्दार्थाभ्यां मिश्रीभवत इत्येवं लाक्षणिकाद् गौणस्य भेदः। यदाह–'गौणे शब्दप्रयोगः, न लक्षणायाम्' इति, तत्रापि लक्षणास्त्येवेति सर्वत्र सैव व्यापिका। सा च पञ्चविधा। तद्यथा–अभिधेयेन *संयोगात्;* द्विरेफशब्दस्य हि योऽभिधेयो भ्रमरशब्दः द्वौ रेफौ यस्येति कृत्वा तेन

NOTES

भ्रमरशब्देन यस्य संयोग: सम्बन्ध: षट्पदलक्षणस्यार्थस्य सोऽर्थो द्विरेफशब्देन लक्ष्यते, अभिधेयसम्बन्धं व्याख्यातरूपं निमित्तीकृत्य। *सामीप्यात्* 'गङ्गायां घोष:' *समवायादिति* सम्बन्धाादित्यर्थ:, 'यष्टी: प्रवेशय' इति यथा। *वैपरीत्यात्* यथा–शत्रुमुद्दिश्य कश्चिद् ब्रवीति–'किमिवोपकृतं न तेन मम' इति। *क्रियायोगादिति* कार्यकारणभावादित्यर्थ:। यथा-अन्नापहारिणि व्यवहार: प्राणनयं हरति इति। एवमनया लक्षणया पञ्चविधया विश्वमेव व्याप्तम्। तथाहि–'शिखरिणि' इत्यत्राकस्मिकप्रश्नविशेषादिबाधकानुप्रवेशे सादृश्याल्ल–

## ध्वन्यालोक:

न हि ध्वनिप्रभेदो विवक्षितान्यपरवाच्यलक्षण:। अन्ये च बहव: प्रकारा भक्तया व्याप्यन्त; तस्माद्भक्तिरलक्षणम्।। १८।।

## लोचनम्

क्षणास्त्येव। नन्वत्राङ्गीकृतैव मध्ये लक्षणा, कथं तर्ह्युक्तं विवक्षितान्यपरेति? तद्‌भेदोऽत्र मुख्योऽसंलक्ष्यक्रमात्मा विवक्षित:। तद्भेदशब्देन च रसभावतदा-भासतत्प्रशमभेदास्तदवान्तरभेदाश्च, न च तेषु लक्षणया उपपत्ति:। तथाहि-विभावानुभावप्रतिपादके काव्ये मुख्येऽर्थे तावद्बाधकानुप्रवेशोऽप्यसम्भाव्य इति को लक्षणावकाश:?

ननु किं बाधया, इयदेव लक्षणास्वरूपम्–'अभिधेयाविनाभूतप्रतीतिर्लक्ष-णोच्यते।' इति। इह चाभिधेयानां विभावानुभावादीनामविनाभूता रसादय इति लक्ष्यन्ते, विभावानुभावयो: कारणकार्यरूपत्वात्, व्यभिचारिणां च तत्सहकारित्वादिति चेत्–मैवम्; धूमशब्दाद् धूमे प्रतिपन्ने ह्यग्निस्मृतिरपि लक्षणाकृतैव स्यात्, ततोऽग्ने: शीतापनोदस्मृति–

## लोचनम्

रित्यादिरपर्यवसित: शब्दार्थ: स्यात्। धूमशब्दस्य स्वार्थविश्रान्तत्वान्न तावति व्यापार इति चेत्, आयातं तर्हि मुख्यार्थबाधो लक्षणाया जीवितमिति, सति तस्मिन्स्वार्थविश्रान्त्यभावात्। न च विभावादिप्रतिपादने बाधकं किञ्चिदस्ति।

नन्वेवं धूमावगमनानन्तराग्निस्मरणवद्विभावादिप्रतिपत्त्यनन्तरं रत्यादिचित्त-वृत्तिप्रतिपत्तिरिति शब्दव्यापार एवात्र नास्ति। इदं तावदयं प्रतीतिस्वरूपज्ञो मीमांसक: प्रष्टव्य:-किमत्र परचित्तवृत्तिमात्रे प्रतिपत्तिरेव रसप्रतिपत्तिरभिमता भवत:? न चैवं भ्रमितव्यम्; एवं हि लोकगतचित्तवृत्त्यनुमानमात्रमिति का रसता?

NOTES

यस्त्वलौकिकचमत्कारात्मा रसास्वादः काव्यगतविभावादिचर्वणाप्राणो नासौ स्मरणानुमानादिसाम्येन खिलीकारपात्रीकर्तव्यः। किं तु लौकिकेन कार्यकारणानुमानादिना संस्कृतहृदयो विभावादिकं प्रतिपद्यमान एव न ताटस्थ्येन प्रतिपद्यते, अपि तु हृदयसंवादापरपर्यायसहृदयत्वपरवशीकृततया पूर्णीभविष्यद्रसास्वादाङ्कुरी भावेनानुमानस्मरणादिसरणिमनारूह्यैव तन्मयीभवनोचित-

## लोचनम्

चर्वणाप्राणतया। न चासौ चर्वणा प्रमाणान्तरतो जाता पूर्वं, येनेदानीं स्मृतिः स्यात्। न चाधुना कुतश्चित्प्रमाणान्तरादुत्पन्ना, अलौकिके प्रत्यक्षाद्यव्यापारात्। अत एवालौकिक एव विभावादिव्यवहारः। यदाह—'विभावो विज्ञानार्थः लोके कारणमेवाभिधीयते न विभावः। अनुभावोऽप्यलौकिक एव।' 'यदयमनुभावयति वागङ्गसत्त्वकृतोऽभिनयस्तस्मादनुभाव' इति। तच्चित्तवृत्तितन्मयीभवनमेव ह्यनुभवनम्। लोके तु कार्यमेवोच्यते नानुभावः। अत एव परकीया न चित्तवृत्तिर्गम्यत इत्यभिप्रायेण 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' इति सूत्रे स्थायिग्रहणं न कृतम्। तत्प्रत्युत शल्यभूतं स्यात्। स्थायिनस्तु रसीभाव औचित्यादुच्यते, तद्विभावानुभावोचितचित्तवृत्तिसंस्कारसुन्दरचर्वणोदयात्। हृदयसंवादोपयोगिलोकचित्तवृत्तिपरिज्ञानावस्थायामुद्यानपुलकादिभिः स्थायिभूतरत्याद्यवमगाच्च। व्यभिचारी तु चित्तवृत्त्यात्मत्वेऽपि मुख्यचित्तवृत्तिपरवश एव चर्व्यत इति विभावानुभावमध्ये गणितः, अत एव रस्यमानताया एषैव

## लोचनम्

निष्पत्तिः, यत्प्रबन्धप्रवृत्तबन्धुसमागमादिकारणोदितहर्षादिलौकिकचित्तवृत्तिन्यग्भावेन चर्वणारूपत्वम्। अतश्चर्वणात्राभिव्यञ्जनमेव, न तु ज्ञापनम्, प्रमाणव्यापारवत्। नाप्युत्पादनम्, हेतुव्यापारवत्।

ननु यदि नेयं ज्ञाप्तिर्न वा निष्पत्तिः, तर्हि किमेतत्? न न्वयमसावलौकिको रसः, ननु विभावादिरत्र किं ज्ञापको हेतुः, उत कारकः? न ज्ञापको न कारकः, अपि तु चर्वणोपयोगी। ननु क्वैतद् दृष्टमन्यत्र। यत एव न दृष्टं तत एवालौकिकमित्युक्तम्। नन्वेवं रसोऽप्रमाणं स्यात्; अस्तु, किं ततः? तच्चर्वणात् एव प्रीतिव्युत्पत्तिसिद्धेः किमन्यदर्थनीयम्। नन्वप्रमाणकमेतत्; न स्वसंवेदनसिद्धत्वात्। ज्ञानविशेषस्यैव चर्वणात्मत्वात् इत्यलं बहुना। अतश्च रसोऽयमलौकिकः। येन ललितपरुषानुप्रासस्यार्थाभिधानानुपयोगिनोऽपि रसं प्रति व्यञ्जकत्वम्; का तत्र लक्षणायाः शङ्कापि? काव्यात्मकशब्दनिष्पीडनेनैव तच्चर्वणा दृश्यते हि

NOTES

तदेव काव्यं पुनः पुनः पठंश्चर्व्यमाणश्च सहृदयो लोकः, न तु काव्यस्य; तत्र 'उपादायापि

## लोचनम्

ये हेया' इति न्यायेन कृतप्रतीतिकस्यानुपयोग एवेति शब्दस्यापीह ध्वननव्यापारः। अत एवालक्ष्यक्रमता। यत्तु वाक्यभेदः स्यादिति केनचिदुक्तम्, तदनभिज्ञतया। शास्त्रं हि सकृदुच्चारितं समयबलेनार्थं प्रतिपादयद्युगपद्विरुद्धानेक-समयस्मृत्ययोगात्कथमर्थद्वयं प्रत्याययेत्। अविरुद्धत्वे वा तावानेको वाक्यार्थः स्यात्। क्रमेणापि विरम्यव्यापारायोगः पुनरुच्चारितेऽपि वाक्ये स एव, समयप्रकरणादेस्तादवस्थ्यात्। प्रकरणसमयप्राप्यार्थतिरस्कारेणार्थान्तर-प्रत्यायकत्वे नियमाभाव इति तेन 'अग्निहोत्रं जुहुयात्स्वर्गकामः' इति श्रुतौ 'खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमे'ति प्रसज्यते। तत्रापि न काचिदियत्तेत्यनाश्वासता इत्येवं वाक्यभेदो दूषणम्। इह तु विभावाद्येव प्रतिपाद्यमानं चर्वणाविषयतोन्मुखमिति समयाद्युपयोगाभावः न च नियुक्तोऽहमत्र करवाणि, कृतार्थोऽहमिति शास्त्रीयप्रतीतिसदृशमदः। तत्रोत्तरकर्तव्यौन्मुख्येन लौकिकत्वात्। इह तु

## लोचनम्

विभावादिचर्वणाद्भुत-पुष्पवत्तत्कालसारैवोदिता न तु पूर्वापरकालानुबन्धिनीति लौकिकादास्वादाद्योगिविषयाच्चान्य एवायं रसास्वादः। अत एव 'शिखरिणि' इत्यादावपि मुख्यार्थबाधादिक्रममनपेक्ष्यैव सहृदया वक्त्र्यभिप्रायं चाटुप्रीत्यात्मकं संवेदयन्ते। अत एव ग्रन्थकारः सामान्येन विवक्षितान्यपरवाच्ये ध्वनौ भक्तेरभावमभ्यधात्। अस्माभिस्तु दुर्दुरूटं प्रत्याययितुमुक्तम्-भवत्वत्र लक्षणा, अलक्ष्यक्रमे तु कुपितोऽपि किं करिष्यसीति। यदि तु न कुप्यते 'सुवर्णपुष्पाम्' इत्यादावविवक्षितवाच्येऽपि मुख्यार्थबाधादिलक्षणासामग्रीमनपेक्ष्यैव व्यङ्ग्यार्थ-विश्रान्तिरित्यलं बहुना। उपसंहरति-*तस्माद्भक्तिरिति*।। १८।।

## ध्वन्यालोकः

### कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम्।

सा पुनर्भक्तिर्वक्ष्यमाणप्रभेदमध्यादन्यतमस्य भेदस्य यदि नामोपलक्षणतया सम्भाव्येत; यदि च गुणवृत्त्यैव ध्वनिर्लक्ष्यत इत्युच्यते तदभिधाव्यापारेण तदितरोऽलङ्कारवर्गः समग्र एव लक्ष्यत इति प्रत्येकमलङ्काराणां लक्षणकरण-वैयर्थ्यप्रसङ्गः। किं च

NOTES

## लोचनम्

ननु मा भूद् ध्वनिरिति भत्तिरिति चैकं रूपम्। मा च भूद्भक्तिर्ध्वनेर्लक्षणम्। उपलक्षणं तु भविष्यति; यत्र ध्वनिर्भवति, तत्र भक्तिरप्यस्तीति भक्तयुपलक्षितो ध्वनिः। न तावदेतत्सर्वत्रास्ति, इयता च किं परस्य सिद्धं? किं वा नः त्रुटितम्? इति तदाह–*कस्यचिदित्यादि।* ननु भक्तिस्तावच्चिरन्तनैरुक्ता, तदुपलक्षणमुखेन च ध्वनिमपि समग्रभेदं लक्षयिष्यन्ति ज्ञास्यन्ति च। किं तल्लक्षणेनेत्याशङ्क्याह–*यदि चेति।*

## ध्वन्यालोकः

### लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः॥ १९॥

कृतेऽपि वा पूर्वमेवान्यैर्ध्वनिलक्षणे पक्षसंसिद्धिरेव नः; यस्माद् ध्वनिरस्तीति नः पक्षः। स च प्रागेव संसिद्ध इत्ययत्नसम्पन्न-

## लोचनम्

अभिधानाभिधेयभावो ह्यलङ्काराणां व्यापकः; ततश्चाभिधावृत्ते वैयाकरण-मीमांसकैर्निरूपिते कुत्रेदानीमलङ्कारकाराणां व्यापारः। तथा हेतुबलात्कार्यं जायत इति तार्किकैरुक्ते किमिदानीमीश्वरप्रभृतीनां कर्तृणां ज्ञातॄणां वा कृत्यमपूर्वं स्यादिति सर्वो निरारम्भः स्यात्। तदाह–*लक्षणाकरणवैयर्थ्यप्रसङ्ग इति।* मा भूद्वाऽपूर्वोन्मीलनं पूर्वोन्मीलितमेवास्माभिः सम्यङ्निरूपितं, तथापि को दोष इत्यभिप्रायेणाह–*किं चेत्यादि। प्रागेवेति।* अस्मत्प्रयत्नादिति शेष एवं त्रिप्रकारमभाववादं, भक्तयन्तर्भूततां च निराकुर्वता अलक्षणीयत्वमेतन्मध्ये निराकृतमेव। अत एव मूलकारिका साक्षात्तन्निराकरणार्था न श्रूयते। वृत्तिकृत्तु निराकृतमपि प्रमेयशय्यापूरणाय कण्ठेन तत्पक्षमनूद्य निराकरोति–*येऽपीत्यादिना।* उक्तया

## ध्वन्यालोकः

समीहितार्थाः संवृत्ताः स्मः। येऽपि सहृदयहृ-दयहॉसंवेद्यमनाख्येयमेव ध्वनेरात्मानमाम्नासिषुस्तेऽपि न परीक्ष्य वादिनः। यत उक्तया नीत्या वक्ष्यमाणया च ध्वनेः सामान्यविशेषलक्षणे प्रतिपादितेऽपि यद्यनाख्येयत्वं तत्सर्वेपामेव वस्तूनां तत्प्रसक्तम्। यदि पुनर्ध्वनेरतिशयोक्तत्यानया काव्यान्तरातिशायि तैः स्वरूपमाख्यायते तत्तेऽपि युक्ताभिधायिन एव।।

*इति श्री राजानकानन्दवर्धनाचार्यविरचिते ध्वन्यालोके प्रथम उद्योतः।।*

NOTES

## लोचनम्

नीत्या 'यत्रार्थः शब्दो वा' इति सामान्यलक्षणं प्रतिपादितम्। वक्ष्यमाणया तु नीत्या विशेषलक्षणं भविष्यति 'अर्थान्तरे सङ्क्रमितम्' इत्यादिना। तत्र प्रथमोद्द्योते ध्वनेः सामान्यलक्षणमेव कारिकाकारेण कृतम्। द्वितीयोद्द्योते कारिकाकारोऽवान्तरविभागं विशेषलक्षणं च विदधदनुवादमुखेन मूलविभागं द्विविधं सूचितवान्। तदाशयानुसारेण तु वृत्तिकृदत्रैवोद्द्योते मूलविभागमवोचत्– 'स च द्विविधः' इति। *सर्वेषामिति।* लौकिकानां शास्त्रीयाणां चेत्यर्थः *अतिशयोक्त्येति*। यथा 'तान्यक्षराणि हृदये किमपि

## लोचनम्

स्फुरन्ति' इतिवदतिशयोक्तयानाख्येयतोक्ता साररूपतां प्रतिपादयितुमिति दर्शितमिति शिवम्।। १९।।

**किं लोचनं विनालोको भाति चन्द्रिकयापि हि।**
**तेनाभिनवगुप्तोऽत्र लोचनोन्मीलनं व्यधात्।।**
**यदुन्मीलनशक्तयैव विश्वमुन्मीलति क्षणात्।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्।।**

*इति श्रीमहामाहेश्वराचार्यवर्याभिनवगुप्तोन्मीलिते सहृदयालोकलोचने ध्वनिसङ्केते प्रथम उद्द्योतः।।*

❑❑❑